Digitized by Arya Samaj Foundation Chennai and eGangotri

સરલ સંસ્કૃત

યોજક
નાનાભાઈ ભટ્ટ

પ્રકાશક
શ્રી સર્વોદય સહકારી પ્રકાશનસંઘ લિ.
રાષ્ટ્રીય શાળા, રાજકોટ. . 'લોકભારતી', સણોસરા

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

पुस्तक संख्या...... 66 ग / 88

पञ्जिका संख्या...... 24344

पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है। कोई सज्जन पन्द्रह दिन से अधिक देर तक पुस्तक अपने पास नहीं रख सकते। अधिक देर तक रखने के लिये पुनः आज्ञा प्राप्त करनी चाहिये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

સરલ સંસ્કૃત

स्टाक प्रमाणीकरण १९८४-१९८५

યોજક

નાનાભાઈ ભટ્ટ

66 ग
84
3/85

CHECKED 1973
Initial

પ્રકાશક

શ્રી સર્વોદય સહકારી પ્રકાશનસંઘ લિ.

રાષ્ટ્રીયશાળા, રાજકોટ . . 'લોકભારતી', સણોસરા.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

પ્રકાશક
શ્રી મનુભાઇ રા. પંચોળી
'લોકભારતી' : સણોસરા
(સૌરાષ્ટ્ર)

૧-૪-૦

મુદ્રક
શાંતિલાલ છો. પારેખ
સરસ્વતી પ્રિ. : પ્રેસ
ભાવનગર

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

સુધારેલી વધારેલી નવી છઠ્ઠી આવૃત્તિની

પ્રસ્તાવના

વર્ષો પહેલાં 'દક્ષિણામૂર્તિ'માં પરિચય પદ્ધતિ અનુસાર સંસ્કૃત ભાષા શીખવવાનો અમે પ્રયત્ન કર્યો હતો. અને એ પ્રયત્નના પરિણામે પરિચય પદ્ધતિનાં ત્રણ પુસ્તકો અમે લખ્યાં હતાં. આ પુસ્તકોનો ઉદ્દેશ સંસ્કૃત ભાષાનું જ્ઞાન નાની ઉંમરના વિદ્યાર્થીઓને સહેલાઈથી, રસપૂર્વક, અને છતાં પદ્ધતિસર આપવાનો હતો.

આજે શરૂઆતનાં એ બે પુસ્તકોને ટૂંકાવીને એને નવું રૂપ હું આપું છું. મૂળ પુસ્તકોમાં ભાષાનો યથાર્થ બોધ થવા માટે એક જ પ્રયોગની પુનરુક્તિ કરવામાં આવી હતી. આવી પુનરુક્તિ નાની ઉંમરના એ વિદ્યાર્થીઓને માટે ખાસ જરૂરની હતી. આ પુસ્તકો અધ્યાપનમંદિરના વિદ્યાર્થીઓને સંસ્કૃત ભાષામાં પ્રવેશ આપવા માટે, સંસ્કૃત ભાષાનો પરિચય કરાવવા માટે અને એ ભાષા મારફત ભારતની

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

સંસ્કૃતિનું અનાયાસે તેમને પાન થઈ જાય એ હેતુથી લખાયાં છે. એટલે મોટી ઉંમરના વિદ્યાર્થીઓને માટે પ્રયોગોની વધારેપડતી પુનરુક્તિઓ આમાં દાખલ કરી નથી. આ સિવાય મૂળ પુસ્તકો, એની ઢબ, એનો ક્રમ વગેરે તેમનાં તેમ કાયમ રાખવામાં આવ્યાં છે.

અધ્યાપનમંદિરના વિદ્યાર્થીઓ આ પુસ્તકો મારફત ભારતના સાંસ્કૃતિક સાહિત્યમાં પ્રવેશ પામે તો અમારો પ્રયત્ન સફળ થયો ગણાશે.

લોકભારતી, સણોસરા
સપ્ટેમ્બર : ૧૯૫૩

નાનાભાઈ ભટ્ટ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथम पुस्तक

१

अहम् कृष्णः ।

अहम् रामः ।

अयम् समुद्रः ।

अयम् आचार्यः ।

अयम् शिष्यः ।

अयम् वृक्षः ।

अयम् घटः ।

अयम् दीपः ।

अयम् दण्डः ।

अयम् सिंहः ।

अयम् व्याघ्रः ।

अयम् अहम् आचार्यः ।

अयम् अहम् छात्रः ।

अयम् अहम् भिक्षुकः ।

अयम् अहम् पथिकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२

इदम् पर्णम् ।

इदम् पुष्पम् ।

इदम् आसनम् ।

इदम् वातायनम् ।

इदम वस्त्रम् ।

इदम् तृणम् ।

इदम् जलम् ।

इदम् दुग्धम् ।

इदम तक्रम् ।

इदम् तैलम् ।

इदम् घृतम् ।

इदम् पात्रम् ।

इदम् द्वारम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३

अहम् गच्छामि ।

रामः गच्छति ।

लक्ष्मणः गच्छति ।

शिष्यः गच्छति ।

आचार्यः गच्छति ।

छात्रः गच्छति ।

सिंहः गच्छति ।

व्याघ्रः गच्छति ।

देवः गच्छति ।

असुरः गच्छति ।

आचार्यः गच्छति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४

अहं पतामि ।

दशरथः पतति ।

रामः पतति ।

भीमः पतति ।

नकुलः पतति ।

कन्दुकः पतति ।

दण्डः पतति ।

घटः पतति ।

वस्त्रं पतति ।

पात्रं पतति ।

तैलं पतति ।

घृतं पतति ।

जलं पतति ।

फलं पतति ।

पर्णं पतति ।

कुमुदं पतति ।

चक्रं पतति ।

विमानं पतति ।

गाण्डीवं पतति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५

अहं शंकरं नमामि ।

अहं सूर्यं नमामि ।

अहं चन्द्रं नमामि ।

अहं देवं नमामि ।

शिष्यः आचार्यं नमति ।

भक्तः देवं नमति ।

ज्वलनः दहति ।

ज्वलनः वस्त्रं दहति ।

ज्वलनः दण्डं दहति ।

ज्वलनः कम्बलं दहति ।

ज्वलनः गृहं दहति ।

६

अहं वदामि ।

अहं सत्यं वदामि ।

सत्यं वदामि, परलोकहितं वदामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युधिष्ठिरः सत्यं वदति ।
हरिश्चन्द्रः सत्यं वदति ।
रामः प्रियं वदति ।
बालः मधुरं वदति ।
पापः असत्यं वदति ।
आचार्यः सत्यं वदति, न अनृतं ।

७

अहं पुस्तकं त्यजामि ।
रामः राज्यं त्यजति ।
जनकः पुत्रं त्यजति ।
मयूरः पिच्छं त्यजति ।
अर्जुनः गाण्डीवं त्यजति ।
ब्राह्मणः शर्म न त्यजति ।
क्षत्रियः शौर्यं न त्यजति ।
शूद्रः सेवाभावं न त्यजति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

૮

अहं द्वारं गच्छामि ।

अहं वातायनं गच्छामि ।

अहं स्वर्गं गच्छामि ।

सूर्यः उदयं गच्छति ।

चन्द्रः अस्तं गच्छति ।

युधिष्ठिरः हिमालयं गच्छति ।

दुष्यन्तः आश्रमं गच्छति ।

दुर्जनः विनाशं गच्छति ।

लक्ष्मणः क्रोधं गच्छति ।

९

भोः भीम, त्वं किं पिबसि ।

अहं जलं पिबामि ।

भोः बाल, त्वं किं पिबसि ।

अहं दुग्धं पिबामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोः छात्र, त्वं किं पिबसि ।

अहं तक्रं पिबामि ।

भोः सिद्धार्थ, त्वं किं त्यजसि ।

अहं राज्यं त्यजामि ।

भोः ध्रुव, त्वं किं त्यजासि ।

अहं मातरं त्यजामि ।

भोः छात्र, त्वं किं त्यजासि ।

अहं आलस्यं त्यजामि ।

भोः........, त्वं किं वदसि ।

अहं सत्यं वदामि ।

भोः........, त्वं क गच्छसि ।

अहं द्वारं गच्छामि ।

भोः........, त्वं क गच्छसि ।

अहं विद्यालयं गच्छामि ।

भोः भास्कर, त्वं जलं पिब ।

अहं जलं पिबामि ।

भास्करः जलं पिबति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोः........, त्वं सूर्यं नम ।

अहं सूर्यं नमामि ।

........सूर्यं नमति ।

भोः........, त्वं कर्णं स्पृश ।

अहं कर्णं स्पृशामि ।

........कर्णं स्पृशति ।

भोः........, त्वं सत्यं वद ।

अहं सत्यं वदामि ।

........सत्यं वदति ।

भोः........, त्वं द्वारं गच्छ ।

अहं द्वारं गच्छामि ।

........द्वारं गच्छति ।

भोः........, त्वं लिख ।

अहं लिखामि ।

........लिखति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०

जलं पतति ।

पुस्तकं पतति ।

हस्तात् पुस्तकं पतति ।

पादपात् पत्रं पतति ।

पादपः शैलात् पतति ।

वृक्षात् फलं पतति ।

शैलः स्थानात् न चलति ।

रामः सत्यात् न चलति ।

कृष्णः रथात् अवतरति ।

नारदः आकाशात् अवतरति ।

वानरः वृक्षात् वृक्षं उत्पतति ।

भिक्षुकः गृहात् गृहं गच्छति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११

तव हस्ते इदं किं अस्ति ।

मम हस्ते पुस्तकं अस्ति ।

तव हस्ते इदं किं अस्ति ।

मम हस्ते फलं अस्ति ।

मम हस्ते पत्रं अस्ति ।

मम हस्ते घटः अस्ति ।

घटे जलं न अस्ति ।

वर्गे आचार्यः परिभ्रमति ।

हस्ते पुष्पं नास्ति ।

कण्ठे आभरणं नास्ति ।

दीपे तैलं नास्ति ।

सूर्ये अंधकारः नास्ति ।

देहे चैतन्यं नास्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२

अहं छात्रालये निवसामि ।

मृगः अरण्ये वसति ।

सिंहः वने वसति ।

कूर्मः जलाशये निवसति ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।

शैले शैले न माणिक्यं
मौक्तिकं न गजे गजे ।

अनभ्यासे विषं विद्या
अजीर्णे भोजनं विषम् ।

उत्सवे व्यसने चैव
दुर्भिक्षे शत्रुविग्रहे ।

राजद्वारे श्मशाने च
यः तिष्ठति सः बांधवः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३

कस्य इदं पुस्तकम् ।

मम इदं पुस्तकम् ।

कस्य इदं वस्त्रम् ।

भास्करस्य इदं वस्त्रम् ।

कस्य इदं आसनम ।

इदं आसनं लक्ष्मणस्य ।

कस्य इदं गृहम् ।

मम मित्रस्य इदं गृहम् ।

कस्य इदं वल्कलम् ।

इदं वल्कलम् रामस्य ।

कस्य अयं घटः ।

अयं घटः मम ।

कस्य इदं अङ्गुलीयकम् ।

रामस्य इदं अङ्गुलीयकम् ।

कस्य अयं कन्दुकः ।

अयं कन्दुकः न मम ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४

एकः आचार्यः गच्छति ।

द्वौ आचार्यौ गच्छतः ।

त्रयः आचार्याः गच्छन्ति ।

चत्वारः आचार्याः गच्छन्ति ।

आचार्याः गच्छन्ति ।

एकः शृगालः वने चरति ।

द्वौ शृगालौ वने चरतः ।

त्रयः शृगालाः वने चरन्ति ।

एकः बालः क्रीडति ।

द्वौ बालौ क्रीडतः ।

त्रयः बालाः क्रीडन्ति ।

चत्वारः बालाः क्रीडन्ति ।

पञ्च बालाः क्रीडन्ति ।

पञ्च दण्डाः पतन्ति ।

पञ्च पाण्डवाः गच्छन्ति ।

षड् कन्दुकाः पतन्ति ।

एकतः सकलाः वेदाः ब्रह्मचर्यं तथैकतः ।
एकतः सर्वपापानि मद्यपानं तथैकतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चलं चित्तं चलं वित्तं चले जीवितयौवने।
चलाचलमिदं सर्वं धर्मः एकः हि निश्चलः॥
काकः कृष्णः पिक कृष्णः कः भेदः पिककाकयोः।
वसन्तसमये तात काकः काकः पिकः पिकः॥

१८

एकं पुस्तकम्।
द्वे पुस्तके।
त्रीणि पुस्तकानि।
चत्वारि पुस्तकानि।
पञ्च पुस्तकानि।
पुस्तकानि पतन्ति।
एकं नेत्रं काणस्य।
द्वे नेत्रे मम।
त्रीणि नेत्राणि शंकरस्य।
चत्वारि मुखानि अग्रजस्य।
कामः क्रोधः लोभः मोहः मदः मत्सरः
च एते षड् विकाराः।
सप्त तुरङ्गमाः सूर्यस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१६

छात्रस्य मस्तकं चलति।

छात्राणां मस्तकानि चलन्ति।

एकस्य वृक्षस्य पत्राणि पतन्ति।

वृक्षाणां पत्राणि पतन्ति।

अयं पुस्तकानां समूहः अस्ति।

अयं पुष्पाणां समूहः।

इन्द्रः देवानां नृपः।

श्रीकृष्णः पाण्डवानां परमं मित्रम्।

दुर्योधनः कौरवाणां ज्येष्ठः।

युधिष्ठिरः पाण्डवानां ज्येष्ठः।

मृगाः चरन्ति पर्वतानां अग्रे।

चित्रकूटपर्वते वानराणां यूथं पश्यति रामः।

पादपानां भयं वातः पद्मानां शिशिरः भयम्।
पर्वतानां भयं वज्रः साधूनां दुर्जनः भयम्॥

विद्यातुराणां न सुखं न निद्रा
क्षुधातुराणां न रुचिः न कालः।

संमीलने नयनयो र्न हि किंचिदस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१७

अहं मस्तकं स्पृशामि ।
अहं करेण मस्तकं स्पृशामि ।
एकेन चक्रेण रथः न चलति ।
अहं एकेन नेत्रेण पश्यामि पत्रम् ।
द्वाभ्यां नेत्राभ्यां पश्यामि पत्रम् ।
द्वाभ्यां चक्राभ्यां गच्छति रथः ।
द्वाभ्यां पादाभ्यां गच्छामि अहम् ।
अहम् पादेन खञ्जः ।
भीमः अर्जुनेन सह गच्छति ।
रत्नैः शिष्यस्य किं प्रयोजनम् ।
तापसः अहम् । आभरणेन न मे प्रयोजनम् ।
ब्राह्मणः अहम् । द्रव्येण न मे प्रयोजनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८

सूर्याय स्वाहा, इदं सूर्याय न मम।
इन्द्राय स्वाहा, इदं इन्द्राय न मम।
परोपकारः पुण्याय पापाय परपीडनम्।

आचार्याय नमः। कश्यपाय नमः। गोतमाय नमः भरद्वाजाय नमः। विश्वामित्राय नमः। अरुन्धतीवसिष्ठाभ्यां नमः। गोतमभरद्वाजाभ्यां नमः। सर्वेभ्यः देवेभ्यः नमः। सर्वेभ्यः ब्राह्मणेभ्यः नमः।

१९

अहं नृत्यामि।
वृक्षे मयूरः नृत्यति।
चूते कोकिलः नृत्यति।
अहं कुप्यामि।
आचार्यः न कुप्यति शिष्येभ्यः।
नृपाः कुप्यन्ति सचिवेभ्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूर्खाः कुप्यन्ति विना कारणं ।
अहं पुस्तकं पश्यामि ।
कौशिकः दिवा न पश्यति ।
सागरः क्षुभ्यति ।
धीरः नरः दुःखे न क्षुभ्यति ।
पल्वलस्य जलं सूर्यस्य तापेन शुष्यति ।
धीरः विपत्तिसमये न मुह्यति ।
मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति सः पश्यति ॥

२०

अहं लक्ष्मणं पृच्छामि ।
अहं आचार्यं पृच्छामि ।
बालाः जनकं पृच्छन्ति ।
शिष्याः वैशंपायनं पृच्छन्ति ।
संसारे जनाः सुखं इच्छन्ति ।
योधाः रणे विजयं इच्छन्ति ।
ईश्वरः विश्वं सृजति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मम हृदयं स्फुरति ।

मम वामं नेत्रं स्फुरति ।

मम बाहुः स्फुरति ।

२१

अहं रूप्यकान् गणयामि ।

त्वं पुस्तकानि गणयसि ।

अहं वृक्षान् गणयामि ।

अयं बालः मां प्रीणयति ।

यः जनकं प्रीणयति सः पुत्रः ।

शिष्याः सुचरितेन आचार्यं प्रीणयन्ति ।

यजमानाः देवान् प्रीणयन्ति ।

अयं व्रणः मां पीडयति ।

दुष्टाः नृपाः जनान् पीडयन्ति ।

तस्कराः लोकान् पीडयन्ति ।

स्तेनः परस्य द्रव्यं चोरयति ।

न अहं कदाचिदपि मित्रस्य रूप्यकान् चोरयामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

66गी
४४
२५१२४४

२२

अहं दुष्टं ताडयामि।
अहं तस्करं ताडयामि।
कः स्तेनं ताडयति।
नृपः स्तेनं ताडयति।
आचार्यः शिष्यान न कदाचिद् अपि ताडयति।
अहं हस्तौ प्रक्षालयामि।
अहं मुखं प्रक्षालयामि।
नराः पादान् प्रक्षालयन्ति।
जनकः अष्टावक्रस्य पादौ प्रक्षालयति।
व्यासः नलाख्यानं कथयति।
शौनकः भारतं कथयति।
आचार्यः बालेभ्यः वार्ताम् कथयति।
अलंकारः पुरुषं न भूषयति।
गुणः पुरुषम् भूषयति।
केयूराः नरं न विभूषयन्ति।
अहं मोदकाय स्पृहयामि।
रामः मोदकाय स्पृहयति।
बालाः मोदकेभ्यः स्पृहयन्ति।
छात्राः अनध्यायाय स्पृहयन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३

का इयम् ।

इयं बाला ।

इयं बाला गच्छति ।

माला मम हस्तात् पतति ।

इयं शिला कठोरा अस्ति ।

कोमला इयं शय्या ।

इयं गङ्गा मन्दं मन्दं वहति ।

इयं यमुना शीघ्रं वहति ।

सुरम्या खलु इयं नर्मदा ।

पाण्डवसेना कुरुक्षेत्रं गच्छति

सीता गोदावरीतीरे उपविशति ।

कस्य इयं पर्णशाला ।

रामः लतां स्पृशति ।

भरतः अयोध्यां गच्छति

दिलीपः जायां पृच्छति ।

गरुडः विनतां आह्लादयति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४

इयं तुला।

इयं मम जिह्वा।

इयं माला।

इयं एका माला।

इमे द्वे माले।

इमाः तिस्रः मालाः।

इयं एका मक्षिका।

इमे द्वे मक्षिके।

इमाः तिस्रः मक्षिकाः।

इयं एका छुरिका।

इमे द्वे छुरिके।

इमाः चतस्रः छुरिकाः।

इयं एका ललना।

इमे द्वे ललने।

इमाः ललनाः।

अहं मालां स्पृशामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं मालाः स्पृशामि ।

भास्करः शय्यां त्यजति ।

भास्करः शय्याः स्पृशति ।

बालाः शय्याः त्यजन्ति ।

नृपः प्रजाः रक्षति ।

अहं ललनाः पश्यामि ।

असुरः देवकन्याः पीडयति ।

२५

जिह्वया अन्नं आस्वादयामि ।

तुलया घृतं तोलयति ।

छुरिकया दण्डं छेदयति सः ।

यष्टिकया स्तेनं ताडयति सः ।

पुरुषः विद्यया देवलोकं गच्छति ।

दुर्जनः तुष्यति परनिन्दया ।

गदया भीमः दुर्योधनं चूर्णयति ।

निशया चन्द्रः शोभते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योत्स्नया सर्वं धवलं भवति ।

ईश्वरेच्छया विषं अपि अमृतं भवति ।

प्रजाभिः नृपः शोभते ।

मालाभिः पूर्णः मम कण्ठः ।

छुरिकाभिः न मे प्रयोजनम् ।

योधाः गदाभिः युध्यन्ते ।

इयं शाला कन्याभिः एव शोभते ।

यष्टिकाभिः क्रीडन्ति बालाः ।

इदं गङ्गायाः जलम् ।

इदं यमुनायाः जलम् ।

इदं नर्मदायाः जलम् ।

इदं ललनायाः वस्त्रम् ।

इदं शारदायाः पुस्तकं ।

इदं सीतायाः कङ्कणम् ।

रामः सीतायाः प्राणेभ्यः अपि प्रियः ।

शिलायाः तलम् उष्णं अस्ति ।

शिलायाः तलम् शीतलं अस्ति ।

गङ्गायाः तीरे एकां पर्णशालां पश्यामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुशः सीतायाः पुत्रः ।

विनयः विद्यायाः भूषणम् ।

प्रजानां संरक्षणं नृपस्य प्रथमः धर्मः ।

लतानां पुष्पाणि पतन्ति ।

तृष्णानां अन्तः न अस्ति ।

२६

मालायां एकं पुष्पं श्वेतं अस्ति ।

लतायां एकं अपि पुष्पं न अस्ति ।

यष्टिकायां छेदं पश्यामि ।

नर्मदायां नक्राः तरन्ति ।

वृक्षस्य छायायां तिष्ठन्ति शिष्याः ।

अयोध्यायां दशरथः प्रतिवसति ।

मिथिलायां जनकः प्रतिवसति ।

शकुन्तलायां अपूर्वः स्नेहः दुष्यन्तस्य ।

सभायां मूर्खः मौनं भजति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२७

गङ्गायमुनयोः जलानि प्रयागे संगच्छन्ते ।
ललनासु सीता उत्तमा ।
राजकन्या सर्वासु कलासु चतुरा ।
विषमासु दशासु न मुह्यति धीरः ।
लतासु पुष्पाणि विकसन्ति ।
वृक्षाणां छायासु मयूराः नृत्यन्ति ।
सिकतासु तैलं न अस्ति ।

२८

गुरुः यथा प्राज्ञे विद्यां वितरति तथा एव जडे।
सीतायाः परिसान्त्वनाय नरेन्द्रः विशति वासगृहम् ।
वासिष्ठस्य पर्णशालायां नृपः निशां नयति ।
रथ्यायां बालाः क्रीडन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिलां उपविशति शकुन्तला।

लूनायां लतायां प्रसूनस्य आगमः कुतः भवति।

दण्डकायां दाशरथिः वसति।

शनैः शनैः तृष्णायाः पारं गच्छति यतिः।

कुशः सीतायाः ज्येष्ठः पुत्रः।

सीतायां न दोषस्य संभवः।

सीतया सह राघवः वनं गच्छति।

विनयः विद्यायाः भूषणम्।

उत्तमशिष्यस्य भवति विद्यायां व्यसनम्।

चिन्तया स्वास्थ्यं नश्यति।

वत्से सीते, गोदावरीप्रभावात् वनदेवताः अपि त्वां न पश्यन्ति।

मुनिकन्यकाः जलं सिञ्चन्ति आश्रमवृक्षेषु।

दुष्यन्तः शकुन्तलायै अङ्गुलीयकं यच्छति।

गोतमः लोपामुद्रायै कुप्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९

अहं जलं अपिबम्।

अहं घृतं अपिबम्।

अहं ललाटं अस्पृशम्।

अहं अन्नं अतोलयम।

अहं वातायनं अगच्छम्।

भोः राम, बहिः गच्छ।

राम: बहिः अगच्छत्।

भोः लक्ष्मण, चन्दुलालं स्पृश।

लक्ष्मणः चन्दुलालं अस्पृशत्।

भोः राम, सूर्यं नम।

राम: सूर्यं अनमत्।

पावक: तृणं अदहत्।

विनायकः पत्रं अलिखत्।

रामः सीतया सह वनं अगच्छत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३०

शिष्यः विद्यालयं अगच्छत् ।
शिष्याः विद्यालयं अगच्छन् ।
पुस्तकं हस्तात् अपतत् ।
पुस्तकानि हस्तात् अपतन् ।
बालः कन्दुकं अस्पृशत् ।
बालाः कन्दुकं अस्पृशन् ।
अस्मिन् लतागृहे त्वं अभवः
त्वं कथं तक्रं अपिवः ।
अस्मिन् वने रामः चिरं अवसत् ।
अर्जुनः कृष्णेन सह खाण्डवं वनं अदहत् ।
पाण्डवानां धार्तराष्ट्रैः सह युद्धं अभवत् ।
पाण्डवाः रणे कौरवान् अजयन् ।
स्तेनाः राजद्रव्यं अचोरयन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३१

पुरा किल दशरथः नाम नृपः अभवत्। तस्य रामः लक्ष्मणः भरतः शत्रुघ्नश्च पुत्राः। एकदा विश्वामित्रः दशरथसमीपं आगच्छत् अवदत् च, 'भोः नृप, राक्षसाः वने पीडयन्ति तापसान्। अहं पुनः यज्ञं अनुतिष्ठामि। अतः रामं प्रेषय' इति। दशरथः अवदत्, 'बालः खलु रामः। कथं सः राक्षसान् योधयति' इति। यदा तु विश्वामित्रः रामस्य प्रभावं दशरथाय अकथयत् तदा नृपः प्रीतः अभवत् रामं च लक्ष्मणेन सह अप्रेषयत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२

अहं क्व अगच्छम् ।

त्वं द्वारं गतः ।

कन्दुकः मम हस्तात् पतितः भूमौ ।

मया जलं पीतम् ।

लक्ष्मणः क्व अगच्छत् ।

लक्ष्मणः सीतया सह वनं गतः ।

पुस्तकं क्व अपतत् ।

पुस्तकं आसने पतितम् ।

बिडालः केन ताडितः ।

बिडालः भास्करेण ताडितः ।

कौशिकेन सूर्यः कदापि न दृष्टः ।

रामेण हतः रावणः ।

शालां प्रविष्टः भास्करः ।

सभायां श्रीकृष्णेन रक्षिता द्रौपदी ।

छात्रैः इयं भूमिः उत्खाता ।

मया आरब्धं पठनकार्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३३

लक्ष्मणः गृहं गतः ।

पुस्तकं केन दग्धम् ।

पुस्तकं गोपालेन दग्धम् ।

विश्वनाथेन किं दग्धम् ।

विश्वनाथेन तृणं दग्धम् ।

अद्य मम सर्वं धनं नष्टम् ।

गजः रज्जुभिः बद्धः ।

अहं तडागस्य जले मग्नः ।

अरक्षितं तिष्ठति दैवरक्षितम्
सुरक्षितं दैवहतं विनश्यति ।

वृद्धस्य जनस्य—

गात्रं संकुचितं, गतिः विगलिता,
दन्ताः च नाशं गताः ।

भोगाः न भुक्ताः वयमेव भुक्ताः
तपो न तप्तं, वयमेव तप्ताः ।

कालः न यातः वयमेव याताः
तृष्णा न जीर्णा, वयमेव जीर्णाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३४

अहं एकदा दक्षिणारण्ये अपश्यम्। एकः वृद्धः व्याघ्रः जलाशयतीरे वदति 'भोः भोः पान्थाः, इदं सुवर्णकङ्कणं दानेन यच्छामि' इति। एकः लोभाकृष्टः पान्थः तं अपृच्छत् 'कुत्र कङ्कणं' इति। व्याघ्रः हस्तं प्रसार्य अदर्शयत् कङ्कणं। पश्चात् यावत् सः पान्थः दानग्रहणार्थं स्नातुं गच्छति तावत् सः महापङ्के निमग्नः। पङ्के पतितं तं व्याघ्रः अभक्षयत्।

३५

अयं रविः।

अयं सारथिः।

अयं मम दक्षिणः पाणिः।

अयं मम वामः पाणिः।

अग्निं नमामि।

भास्करः कपिं अपश्यत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाविकः उदधिं अगच्छत् ।

कविं वाल्मीकिं कः न नमति ।

कर्णः सारथिं वदति ।

ऋषयः धर्मं कथयन्ति जनेभ्यः ।

वह्नयः ज्वलन्ति ।

कवयः काव्यानि रचयन्ति ।

३६

ऋषिः अरण्ये वसति ।

कपिः वृक्षात् वृक्षं उत्पतति ।

कविः लिखति काव्यम् ।

रजनीपतिः उदयं अगच्छत् ।

उदधिः क्षुभ्यति ।

अरिः कुप्यति ।

मृगपतयः तृणं कदाचिदपि न खादन्ति ।

उदधयः क्षुभ्यन्ति ।

मुनयः स्नानार्थं गच्छन्ति ।

आश्रमे अग्नयः ज्वलन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३७

अयं मणिः पतति ।

अयं रविः अस्तं गच्छति ।

अयं निशापतिः उदयं गच्छति ।

मणिना हस्तः मे विभाति ।

वारिणा पात्रं शोभते ।

मणिना वलयं वलयेन मणिः

मणिना वलयेन विभाति करः ।

कविना च विभुः विभुना च कविः

कविना विभुना च विभाति सभा ॥

३८

इदं गिरेः शिखरम् ।

अयं ऋषेः आश्रमः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भास्करः अतिथेः मस्तकं स्पृशति ।

हरिलालः कपेः लाङ्गूलं चालयति ।

रामः ऋषेः कर्णे किंचित् कथयति ।

गोपालः मणेः प्रभां पश्यति ।

कर्णः सारथेः पुत्रः ।

सारथेः पाणौ रश्मयः सन्ति ।

अहं कपेः क्रीडां पश्यामि ।

अग्नेः धूमः मां पीडयति ।

अग्नौ पुस्तकं अपतत् ।

मम पाणौ पुष्पाणि सन्ति ।

मम पाणौ कन्दुकः अस्ति ।

उदधौ नक्राः वसन्ति ।

कपिषु कः श्रेष्ठः ।

कपिषु मारुतिः श्रेष्ठः ।

ऋषिषु कः श्रेष्ठः ।

ऋषिषु वसिष्ठः श्रेष्ठः ।

मणिषु कौस्तुभमणिः श्रेष्ठः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३९

किं पश्यसि ।

कपीनां यूथं पश्यामि ।

ऋषीणां वाक्यं न कदापि वितथं भवति ।

गिरीणां गह्वरेषु मृगपतयः वसन्ति ।

कवीनां काव्यानि प्रीणयन्ति नरान् ।

श्रुतीनां पारं गच्छति अयं ब्राह्मणः ।

मणीनां मालया भूषितः सर्पः किं भयंकरः न भवति ।

कुत्र वा अयं दुन्दुभीनां कोलाहलः भवति ।

अहं अतिथये रूप्यकं यच्छामि ।

ॐ अग्नये स्वाहा, इदं अग्नये न मम ।

ऋषिभ्यः नमः ।

अतिथिभ्यः नमः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४०

कः तव गुरुः ।

त्वं मम गुरुः ।

गुरुः क्व गच्छति ।

गुरुः तरुं गच्छति ।

इदं किं ।

अयं परशुः ।

परशुं स्पृश ।

अयं पङ्गुः गिरिं आरोहति ।

पशुः तृणं खादति ।

अहं परशुना वृक्षं कृन्तामि ।

इषुणा शत्रुं अहं युध्ये ।

परमेश्वरः एव एक मम गुरुः ।

द्वौ मम गुरू ।

त्रयः मम गुरवः ।

चत्वारः मे गुरवः ।

पञ्च मे गुरवः ।

षड् मे गुरवः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४१

इक्ष्वाकूणां वंशे दिलीपः नाम नृपतिः आसीत्, तस्य भार्या सुदक्षिणा नाम। दिलीपः तस्यां भार्यायां एकं अपि अपत्यं न अलभत। अतः एकदा नरपतिः जायया सह गुरोः वसिष्ठस्य आश्रमं अगच्छत्। तत्र गुरुं अरुन्धतीं च प्रणम्य पुत्रस्य अलाभे कारणं अपृच्छत् गुरुं वसिष्ठम्। गुरुः तं अवदत्, 'इयं मम धेनुः सुरभिः नाम। तस्याः परिचर्यया तव पुत्रलाभः भवेत्' इति। ततः प्रभृति स नृपः धेनो परिचर्यायां आसक्तः अभवत्। परिचर्याव्रतस्य अन्ते तु सा सुरभिः नृपतये प्रीता अभवत् वरं च अयच्छत्।

अस्य नृपतेः पुत्रः लोकप्रसिद्धः रघुः नाम। तस्य रघोः वंशे उत्पन्नाः राघवाः इति लोके ख्याताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४२

इदं मम शरीरम् ।
इदं मे मस्तकम् ।
इयं मे नासिका ।
इदं मे नेत्रम् ।
इदं मे ललाटम् ।
अयं मे भालप्रदेशः ।
इमौ मे कर्णौ ।
अयं मे कण्ठः ।
इमौ मे बाहू ।
इयं मे जङ्घा ।
इमौ मे पादौ
इयं मे अङ्गुलिः ।
इमे मम नखाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं मम वक्त्रम् ।

इमौ मे ओष्ठौ ।

अयं मे कपोलः ।

इमे मम दन्ताः ।

इयं मे जिह्वा ।

अयं मे करः ।

अयं मे नाभिः ।

इदं मे पादतलम् ।

४३

अहं रामं वन्दे ।

अहं रूप्यकं लभे ।

दिलीपः गुरुं वन्दते ।

सुदक्षिणा पुत्रं लभते ।

इदं वस्त्रं रामाय शोभते ।

भोः लक्ष्मण, किं कम्पसे त्वम् ।

भोः मित्र, किं कम्पते लक्ष्मणः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वायुना वृक्षाः कम्पन्ते ।

वर्षायां इतः ततः तृणं जायते ।

गाण्डीवं स्रंसते हस्तात्
त्वक् चैव परिदह्यते ।

वेपथुश्च शरीरे मे
रोमहर्षश्च जायते ।

स्थानभ्रष्टाः न शोभन्ते
नखाः दन्ताः गजाः नृपाः ।

विनाश्रयं न शोभन्ते
पण्डिताः वनिताः लताः ।

४४

दशरथः रामस्य पिता ।

गोपालः मम पिता ।

लक्ष्मणः रामस्य भ्राता ।

रामः मम भ्राता ।

दुष्यन्तः शकुन्तलायाः भर्ता ।

ईश्वरः जगतः कर्ता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामः जनकस्य जामाता ।

कौशल्या रामचंद्रस्य माता ।

शान्ता रामस्य स्वसा ।

देवकी कंसस्य स्वसा ।

शान्ता सीतायाः ननान्दा ।

उत्तरा विराटराजस्य दुहिता ।

सीता विदेहराजस्य दुहिता ।

शंभुः गजाननस्य पिता ।

पार्वती गजाननस्य माता ।

कन्या वरयते रूपं
  माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति
  मिष्टान्नमितरे जनाः ॥

जनकानां रघूणां च
  संबंधः कस्य न प्रियः ।
यत्र दाता ग्रहीता च
  स्वयं कुशिकनन्दनः ॥

वन्दे मातरम् ।

जगतः पितरौ वंदे पार्वतीपरमेश्वरौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४५

इदं मम पितुः चित्रम् ।

इदं मम मातुः कङ्कणम् ।

पितुः वचनं न उल्लंघयति सुपुत्रः ।

मातुः उत्संगे क्रीडति कृष्णः ।

जामातुः मुखं प्रेक्षते कौशल्या ।

दुहितुः हितमेव चिन्तयति माता ।

पितुः मरणेन भरतः दुःखितः अभवत् ।

मातुः वचनात् ध्रुवः वनं अगच्छत् ।

विवाहकाले कन्यायाः पिता जामातुः पादौ प्रक्षालयति ।

धैर्यं यस्य पिता क्षमा च जननी
शांतिः चिरं गेहिनी
सत्यं सूनुः अयं दया च भगिनी
भ्राता मनः संयमः ।
शय्या भूमितलं दिशोऽपि वसनं
ज्ञानामृतं भोजनम्
एते यस्य कुटुम्बिनः वद सखे
कस्मात् भयं योगिनः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋणकर्ता पिता शत्रुः माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुः अपण्डितः ॥

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्यायात् पथः प्रविचलन्ति पदं न धीराः ॥

४६

एका नदी ।
द्वे नद्यौ :
तिस्रः नद्यः ।
वाप्यां जलं नास्ति ।
वीथ्यां क्रीडन्ति शिशवः ।
दास्यै वस्त्रं यच्छति मम माता ।
जनन्यै मृत्तिकां आनयति बालः ।
कौमुद्यै स्पृहयति चकोरः ।
भोः जननि, अहं लेखिनीभिः क्रीडामि ।
भोः गोदावरि, अगाधं तव जलम् ।
हे दासि, कुत्र गता मे माता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४७

नद्याः जलं सुमधुरम् ।

वाप्याः जलं क्षारम् ।

घोरः अद्य रजन्याः अन्धकारः ।

जनन्याः मुखं पश्यति शिशुः ।

कदल्याः फलानि भूमौ पतन्ति ।

गोदावर्याः पुलिने सीता क्रीडति ।

कैकेय्याः दारुणं वचनं श्रुत्वा दशरथः भूमौ अपतत् ।

जानक्याः वियोगेन रामः भृशं दुःखितः अभवत् ।

द्रौपद्याः स्वयंवरं पाण्डवाः ब्राह्मणवेषेण अगच्छन् ।

गिरिकन्यायाः निश्चयं बुद्ध्वा शंभुः प्रीतः अभवत् ।

'वधूविरहितां अयोध्यां न अहं प्रविशामि' इति अरुन्धत्याः वचनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रौपद्याः केशान् अग्रहीत् दुःशासनः।

शबर्याः बदरीफलानि रामः अभक्षयत्।

ताप्याः तटे कस्य अयं आश्रमः।

इन्दुमत्याः स्वयंवरं अगच्छन् नृपाः।

४८

इयं वापी।

वाप्याम् जलं न अस्ति।

नर्मदायाम् नद्याम् प्रभूतं जलं अस्ति।

पञ्चवट्याम् रामः जानक्या सह चिरं अवसत्।

कः एषः घोरायां रजन्यां इतः ततः चरति।

द्रौपद्यां अर्जुनस्य अधिकः स्नेहः।

वीथ्यां क्रीडन्ति शिशवः।

अवन्त्यां जनाः सुखिनः सन्ति।

सुदक्षिणायां पत्न्यां दिलीपस्य एकः सूनुः अभवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोपीषु राधा श्रीकृष्णस्य प्रियतमा ।

नदीषु विश्वासः न एव कर्तव्यः ।

नगरवीथीषु परिभ्रमति भिक्षुकः ।

दूतः अवन्त्याः आगच्छति ।

मुनिः वाराणस्याः निर्गच्छति ।

रावणः सीतां पञ्चवट्याः लंकां नयति ।

भोः अरुन्धति, त्वां नमामि ।

प्रिये सीते, क्व असि ।

हे नन्दिनि सीते, त्वं राघवाणां कुलवधूः असि।

एषा एका नदी ।

द्वे नद्यौ ।

द्वे वाप्यौ ।

तिस्रः नद्यः ।

बहवः नद्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४९

एकः बालकः जनकेन धेनूनां पालने नियुक्तः। सः चापलात् नित्यं 'भोः भोः जनाः, व्याघ्रः इह आगतः' इति आक्रोशति स्म। तस्य आक्रन्दं श्रुत्वा यदा जनाः साहाय्यार्थं धावन्ति तदा स परिहसति, 'व्याघ्रः नास्ति' इति वदति च। अथ एकस्मिन् दिने व्याघ्रः परमार्थतः आगच्छत्। सः बालः यथापूर्वम् आक्रोशत् परंतु जनाः न तत्र आगच्छन् तस्य च सकलाः धेनवः व्याघ्रेण भक्षिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५०

गौतमस्य महर्षेः तपोवने एकः मुनिः अवसत् । तेन एकः मूषकशावकः संवर्धितः । अथ कदाचित् एकः बिडालः तं मूषकं खादितुं उपाधावत् । मार्जारं दृष्ट्वा सः मूषकः मुनेः क्रोडं प्राविशत् । अतः दयालोः मुनेः प्रभावेण सः मूषकः बिडालः अभवत् । पश्चात् एकदा सः बिडालः कुक्कुरं दृष्ट्वा भीतः । पुनः अपि मुनेः सामर्थ्यात् सः सारमेयः अभवत् । सः सारमेयः व्याघ्रं दृष्ट्वा पलायितः । तेन हेतुना मुनिः तं व्याघ्रं अकरोत् । 'अयं मूषकः मुनेः प्रसादात् व्याघ्रत्वं गतः' इति अत्रतत्र जनाः अवदन् । 'जनवादः मम कीर्तेः लाञ्छनम्' इति मत्वा सः व्याघ्रः मुनिं हन्तुं उद्यतः । तस्मात् मुनिः तं पुनः मूषकं अकरोत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५१

कश्चित् मुनिः एकदा तरुच्छायायां उपविष्टः। तत्र एका बलाका तस्य उपरि विष्टां अमुञ्चत्। तेन क्रुद्धस्य यतेः दृष्टि-मात्रेण सा वराकी भस्मसात् अभवत्। ततः तपप्रभावेण गर्वितः सः यतिः एकदा भिक्षार्थं एकं ब्राह्मणगृहं अगच्छत्। गृहिणी तं उवाच, 'मम पत्युः परिचर्यां कृत्वा भिक्षां यच्छामि' इति। नार्याः तत् वचनं श्रुत्वा मुनिः क्रुद्धः अभवत् नारीं च क्रुद्धाभ्यां लोचनाभ्यां अपश्यत्। सा गृहिणी विहस्य उवाच, 'भोः मुने, न अहं बलाका' इति। नार्याः वचनं श्रुत्वा मुनिः विस्मितः अभवत्। ततः यदा पत्युः शुश्रूषां कृत्वा सा आगच्छत् तदा मुनिः तां अवदत्, 'भद्रे, बलकायाः वृत्तान्तं कथं त्वं अबोधः' इति। पतिदेवता सा गृहिणी प्रत्यवदत्, 'पतिः एव मम परं दैवतम्। तस्य सेवायाः प्रभावेण मम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईदृशम् विज्ञानबलं अस्ति। अस्मिन् विषये मिथिलायां वसन्तं धर्मव्याधं गत्वा पृच्छ' इति।

अथ अन्येद्युः सः मिथिलायां मांस-विक्रये रतं धर्मव्याधं अव्रजत्। धर्मव्याधः तु मुनिं दृष्ट्वा एवं अवदत्, 'भोः तापस, किं तया पतिव्रतया प्रेषितः असि' इति। तत् श्रुत्वा ऋषिः विस्मितः तं अपृच्छत् 'भद्र, कथं त्वया ज्ञातम्' इति।

धर्मव्याधः उवाच। 'अहं मम जनकस्य जनन्याः च परमः भक्तः। तयोः सेवा एव मम परमः धर्मः इति मे मतम्। मांसविक्रयं मम स्वधर्मः इति करोमि, न अर्थलोभतः। हे मुने, अहंकारः ज्ञानस्य विघ्नः। सः मयि न अस्ति न च तस्यां नार्याम्। अतः सा अहं च ज्ञानवन्तौ। त्वं अपि ज्ञानविघ्नं अहंभावं मुक्त्वा ज्ञान-वान् भव' इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६२

अयं शशी उदयाचलं गच्छति।

अयं शिखी वृक्षे नृत्यति।

योगी याज्ञवल्क्यः वेदान् पठति।

मित्रद्रोही नरकं याति।

कञ्चुकी अन्तःपुरं प्रविशति।

केसरी वने चरति।

रोगी चिरप्रवासी
    पराऩ्नभोजी परावसथशायी।
यत् जीवति तत् मरणं
    यत् मरणं सः तस्य विश्रामः॥

गुणी एव गुणं जानाति।

अस्ति ब्रह्मारण्ये कर्पूरतिलकः नाम हस्ती।

दुर्जनः प्रियवादी च न एतत् विश्वासकारणम्।

गुणी गुणं वेत्ति न वेत्ति निर्गुणः
    बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः
    करी च सिंहस्य बलं न मूषकः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं हृदयाचले शशिनं पश्यामि ।

सीता जनस्थाने शिखण्डिनं नर्तयति ।

योगिनं याज्ञवल्क्यं अहं वन्दे ।

नृपः कञ्चुकिनं पृच्छति ।

दिलीपः वने केसरिणं अपश्यत् ।

उपवने शिखिनः डयन्ते ।

अरण्ये केसरिणः भ्रमन्ति ।

योगिनः आत्मशुद्धये यतन्ते ।

प्रियवादिनः जनाः कदाचित अहितं अपि आचरन्ति ।

८३

आकाशे शशिनः कलां पश्यामि ।

शिखण्डिनः कलापं न पश्यसि ।

करिणः कपोलात् मदः स्रवति ।

जम्बूकः हस्तिनः समीपं गत्वा अवदत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकृष्णः किरीटिनः रथं समराङ्गणं अनयत्।

कलापिनः कलापे सर्पः स्थितः।

भार्या मित्रं गृहस्थानां विद्या मित्रं प्रवासिनाम्।
रोगिणां औषधं मित्रं धर्मः मित्रं शरीरिणाम्॥

नदीनां शस्त्रपाणीनां नखिनां शृंगिणां तथा।
विश्वासः नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किं।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥

शशिनि कलङ्कं कथं न पश्यामि।

गुणिनि जने कथं दोषः वर्तते।

उपकारिणि कोपः चेत् कोपे कोपः कथं न ते।

उपकारिषु यः साधुः साधुत्वे तस्य कः गुणः।
अपकारिषु यः साधुः स साधुः इति मे मतिः॥

क्षमा शत्रौ च मित्रे च यतीनां एव भूषणम्।
अपराधिषु सत्त्वेषु नृपाणां सव दूषणम्॥

गुणाः पूजास्थानं गुणिषु न लिङ्गम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाञ्छा सज्जनसंगमे परगुणे प्रीतिः गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिः लोकापवादाद्भयं।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते येषु वसन्ति निर्मलगुणाः तेभ्यः नरेभ्यः नमः॥

शशिना च निशा निशया च शशी
शशिना निशया च विभाति नभः।

कुलपांसवः जनाः न प्रणमन्ति देवताभ्यः, न
मानयन्ति मान्यान् कुप्यन्ति हितवादिने च।

गणेशस्य आखुः शिखिनः न भीतः भवतिः।

शशिनं पुनरेति शर्वरी
दयिता द्वन्द्वचरं पतत्रिणम्।
इति तौ विरहान्तरक्षमौ
कथमत्यन्तगता न मां दहेः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९४

मरुत् वृक्षं कम्पयति ।

हुतभुक् वनं दहति ।

हुतभुक् हुतं दहति ।

यः व्यसने तिष्ठति सः सुहृद् ।

भास्करः हरिलालस्य सुहृद् अस्ति ।

अयोध्यायां दशरथः भूभृत् वसति ।

कृष्णकुमारः अस्य नगरस्य भूभृत् ।

इयं दृषद् न चलति स्थानात् ।

कृष्णा इयं मृद् ।

विद्युत् आकाशे चरति ।

अहो शरद् ऋतुः गता ।

हुतभुजं स्पृशति बालः ।

सुहृदं कुशलं पृच्छति श्रीकृष्णः ।

भूभृतं प्रीणयति अयं कविः ।

दृषदं स्पृशति रामः अहल्यां च जीवयति ।

आकाशे विद्युतं पश्यामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५५

अयं एकः हुतभुक्।

अयं अन्यः हुतभुक्।

अयं अपि अन्यः हुतभुक्।

एते हुतभुजः मम यज्ञशालायां निवसन्ति।

मम सुहृदः कन्दुकैः क्रीडन्ति।

अध्वरे हुतभुजः ज्वलन्ति।

भूभृतः चौरान् दण्डयन्ति।

दृषदः पर्वतात् पतन्ति।

हुतभुजा मम अङ्गुलिः दग्धा।

हुतभुजा तृणं दग्धम्।

माणेकलालेन सुहृदा मम पुस्तकं हृतम्।

लक्ष्मणेन सुहृदा मम लेखिनी चोरिता।

दशरथेन भूभृता रामवियोगेन प्राणाः त्यक्ताः।

विपदा पीडितः अहं देशं त्यजामि।

विद्युता मेघः शोभते।

संपदा गर्वितः जनः विनश्यति।

विद्युता सह मेघः आकाशे चरति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५६

भूभृतः आज्ञा शिरोधार्या ।

हुतभुजः ज्वाला उत्तिष्ठति ।

मृदः विकारः अयं घटः ।

दृषदः तले लक्ष्मणः तिष्ठति ।

सुहृदः विपदा अहं दुखितः अस्मि ।

भीमः मरुतः पुत्रः ।

सुहृदः वचनं अनुल्लंघनीयम् ।

ईश्वरः जगतः कारणम् ।

मरुतां पतिः अर्जुनं आह्वयति ।

सुहृदां वचनं अनुसरति सुयोधनः ।

अवन्तीपतिः सर्वभूभृतां श्रेष्ठः ।

परशुः हुतभुजि पतति ।

व्रीहीन् हुतभुजि त्यजामि ।

मृदि जलं सिञ्चति रामः ।

दृषदि कन्या वस्त्रं त्यजति ।

रामे भूभृति न एकः अपि दोषः ।

सुहृदि भास्करस्य स्नेहः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामः लक्ष्मणं आपदि सान्त्वयति ।

संपदि जनः मोदते ।

आपत्सु धीराः न मुह्यन्ति ।

संपत्सु मूढाः गर्विताः भवन्ति ।

शरदि जलानि अनाविलानि भवन्ति ।

इह जगति जनाः जायन्ते च म्रियन्ते च ।

मधुरा मम वाक् ।

तव वाचि माधुर्यं नास्ति ।

यथा चित्तं तथा वाचा यथा वाचा तथा क्रिया ।

चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥

८७

अयं भगवान् श्रीकृष्णः आगच्छति ।

भगवान् बादरायणः शिष्येभ्यः धर्मं कथयति ।

गुणवान् पुरुषः गुणं वेत्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुष्मान् लवः क्व गतः इति लक्ष्मणं
पृच्छति रामचन्द्रः ।

धीमान् पुरुषः आपदि न मुह्यति ।

धनवान् नरः धनमदेन प्रणश्यति ।

भगवन्तौ वसिष्ठजनकौ इह आगच्छतः ।

भगवन्तौ वसिष्ठविश्वामित्रौ युध्येते ।

भगवन्तं श्रीकृष्णं शरणं गच्छति अर्जुनः ।

गुणवन्तं पुरुषं जनः पूजयति ।

आयुष्मन्तं भरतं आलिङ्गयति रामः ।

धीमन्तं पुरुषं आपदः न मुह्यन्ति ।

धनवन्तं नरं सर्वे जनाः उपासन्ते ।

भगवन्तं नारदं दृष्ट्वा अश्वपतिः आसनात्
उदतिष्ठत् ।

भगवतः मारीचस्य आश्रमं प्रति मातलिः
दुष्यन्तस्य रथं अनयत् ।

धिक् दारिद्र्यवतः पुरुषस्य जीवितम् ।

गुणवतः जनस्य गुणाः एव पूज्याः ।

भगवतः शाक्यमुनेः कीर्तिः दिक्षु प्रथिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५८

भगवति रामचन्द्रे प्रजानां अपूर्वः विश्वासः।

आयुष्मति लवे सीतायाः अधिकः स्नेहः।

बलवति भीमे कः अवकाशः भयस्य।

गुणवति नरे जनानां स्वाभाविकी प्रीतिः भवति।

दोषवति नृपे प्रजानां रागः न भवति।

भवति मम अपूर्वः स्नेहः।

'भवता सह अहं वनं गच्छामि' इति
रामं अवदत् सीता।

भगवता नारायणेन पार्थाय गीता प्रतिबोधिता।

भगवता श्रीकृष्णेन सह गोपकन्याः यमुना-
तटे विचरन्ति।

'आयुष्मता कुशेन ततः किं कृतं' इति
सारथिं सुमन्त्रं अपृच्छत् रामभद्रः।

ॐ नमो भगवते वासुदेवाय।

ॐ नमो भगवते श्रीकृष्णाय।

भोः भगवन्, प्रणतः अस्मि ते पादयोः।

'आयुष्मन् चन्द्रकेतो, क्व ते मित्रं लवः'
इति अपृच्छत् और्मिलेयं राघवः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५९

येन मार्गेण अहं आगतः तेन एव मार्गेण गच्छामि ।

येन केन उपायेन प्राणिषु उपकारं कुर्वन्ति साधवः ।

यैः मेदिनी उत्खाता ये च कपिलस्य कोपेन दग्धाः तान् सगरस्य आत्मजान् भगीरथः गङ्गायाः जलेन उदधरत् ।

यैः पुरा स्ववीर्येण राजन्यानां मध्ये अहं प्राप्ता ते पाण्डवाः परवन्तः ईदृशीं मां पश्यन्ति इति हा हता अस्मि मन्द-भागिनी ।

यस्या बुद्धिः तस्य बलम् ।

यस्य वित्तं अस्ति सः नरः कुलीनः ।

इह जगति कस्य विषयिणः जनस्य आपदः अस्तं गच्छन्ति ।

कस्य इदं आश्रमपदं ? भगवतः कश्यपस्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यं यं प्राणिनं रामः मार्गे अपश्यत् तं तं सीताप्रवृत्तिं अपृच्छत् सः।

दीनः भिक्षुकः यं यं पश्यति तं तं दानार्थं याचते।

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न कुलं न धर्मः।
ते मृत्युलोके भुवि भारभूताः
मनुष्यरूपेण मृगाः चरन्ति॥

६०

भोः राम, इह आगच्छ। इह तिष्ठ।

भोः राम, पुस्तकं आनय।

भोः भास्कर, द्वारं गच्छ।

भोः योध, बाणान् मुञ्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भो: पुस्तक, हस्तात् पत ।

हरे, मां ताडय ।

ऋषे, पाणी क्षालय ।

मात:, वार्ता कथय ।

गुरो, ज्ञानं वितर ।

नदि, मन्दं मन्दं गच्छ ।

जननि, मष्या कलुषितं मम मुखं पश्य ।

पित:, मां स्कंधेन वह ।

भ्रात:, दासीं ताडय ।

सीते, अग्निं प्रविश ।

बाले, मा कुप्य ।

दुष्टं मित्रं त्यज ।

सत्यं वद । धर्मं चर । पूज्यान् पूजय ।
मान्यान् मानय ।

गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ।
यत्र ब्रह्मादय: देवा: तत्र गच्छ हुताशन ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६१

गुरो, अहं गच्छानि।

त्वं गच्छ। रामः अपि गच्छतु।

मातः, जलं पिबानि।

पिब। लक्ष्मणः अपि जलं पिबतु।

पितः, वृक्षच्छायायां तिष्ठानि।

तिष्ठ। भास्करः अपि वृक्षच्छायायां तिष्ठतु।

गुरो, मार्जारं ताडयानि।

ताडय। देवदत्तः अपि तं ताडयतु।

आचार्यः मह्यं वार्तां कथयतु।

बाल, पिता त्वां गृहं नयतु।

शिष्यः नृत्यतु।

छात्रः पुस्तकं आहरतु।

बाला शोकसागरं तरतु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निः दण्डं दहतु।

भरतस्य कल्याणं अस्तु।

शत्रोः अपि मा दुःखं अस्तु।

पुष्पाणि भूमौ पतन्तु।

सूदाः ओदनं पचन्तु।

छात्राः गृहं गच्छन्तु।

मम दुःखानि नश्यन्तु।

मम पापानि नश्यन्तु।

सर्वे जनाः निरामयाः सन्तु।

भोः शिष्याः, गृहं गच्छत, जलं च पिबत।

भोः ऋषयः, सत्यं वदत।

६२

जनः सुखी भवतु। व्याधयः लोके नश्यन्तु। भूपतयः धर्मेण प्रजाः रक्षन्तु। मेघः काले वर्षतु। धरा सस्यवती भवतु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलहः शाम्यतु। कुटुम्बिन्यः गृहभारं धर्मेण वहन्तु। ब्रह्मचारिणः ब्रह्मचर्यं चरन्तु। सन्यासिनः लोकान् सदाचारं उपदिशन्तु। कारुणिकः परमेश्वरः सर्वान् अंधकारात प्रकाशं नयतु

मित्र, शालां गच्छाव। राम, त्वं अपि आगच्छ। त्वं रामः अहं च शालां गच्छाम।

त्वं रामः च गच्छतम्। न अहं आगच्छामि।

भोः वृक्षाः, वायुना चलत।

भोः गुरवः, शिष्येभ्यः विद्यां यच्छत।

भोः मातरः, शिशून् मा ताडयत।

भोः नृपतयः, आश्रितान् जनान् रक्षत।

भोः देवाः, मा कुप्यत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६३

पुत्रः पितरं प्रीणयेत् ।

न मुह्येत् अर्थकृच्छ्रेषु न च धर्मं परित्यजेत् ।

लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवत् आचरेत् ॥

त्यजेत् एकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ॥

आपदर्थे धनं रक्षेत् दारान् रक्षेत धनैः अपि ।
आत्मानं सततं रक्षेत् दारैः अपि धनैः अपि ॥

विषमप्यमृतं कचित् भवेत् ।
अमृतं वा विषमीश्वरेच्छया ।

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥

यथा एकेन चक्रेण न रथस्य गतिः भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥

अजरामरवत् प्राज्ञः विद्यां अर्थं च चिंतयेत् ।
गृहीतः इव केशेषु मृत्युना धर्ममाचरेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स: सुहृद् व्यसने य: स्यात्
स: पुत्र: यस्तु भक्तिमान् ।
सर्वत: जयमन्विच्छेत्
पुत्रात् इच्छेत् पराजयम् ।

६४

पुत्रा: सुचरितै: पितरं प्रीणयेयु: ।
पण्डितानां समाजे मूर्खा: मौनं भजेयु: ।
शिष्या: गुरुं नमेयु: ।
भृत्या: स्वामिनं अनुसरेयु: ।
ब्राह्मणा: धर्मं वदेयु: ।
कदापि धर्मं न त्यजेयं, भो: प्रभो ।
हे पुत्र, उन्मार्गेण न गच्छे: ।
भो: ब्राह्मणपुत्र, वेदान् पठ । ब्राह्मण: वेदान् पठेत् ।
भो: मित्र, त्वं तृषित: असि, जलं पिब । तृषित: जलं पिबेत् ।
भो: शिष्य, सत्यं वद नानृतम् । सर्वथा सत्यमेव वदेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६८

प्रश्नोत्तरमाला

प्र–किं दानम् ?

उ–यत् अनाकांक्षं दानं तत् दानम् ।

प्र–किं मित्रम् ?

उ–यत् निवारयति पापात् तत् मित्रम् ।

प्र–कः अलंकारः ?

उ–शीलं अलंकारः ।

प्र–किं वाचां मण्डनम् ?

उ–सत्यं वाचां मण्डनम् ।

प्र–कः अन्धः ?

उ–यः अकार्यरतः सः अन्धः ।

प्र–कः बधिरः ?

उ–यः हितानि न शृणोति सः बधिरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र–कः मूकः ?

उ–यः काले प्रियाणि न वदति सः मूकः।

प्र–किं तीर्थम् ?

उ–हरिपादौ एव तीर्थम्।

प्र–किं रत्नम् ?

उ–अच्छा मतिः रत्नम्।

प्र–किं शास्त्रम् ?

उ–यस्य श्रवणेन द्वैतान्धकारोदयः गलति
तत् शास्त्रम्।

प्र–उपकाररसिकं मित्रं किम् ?

उ–तत्त्वावबोधः उपकाररसिकं मित्रम्।

प्र–खेददानकुशलः शत्रुः कः।

उ–दुर्वासनानां संचयः खेददानकुशलः शत्रुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६६

क: खलु ब्राह्मण: परमार्थत: ?

य: शीलवान् स: ब्राह्मण: परमार्थत: ।

क: नरकं व्रजति ?

य: विश्वासघातक: स: नरकं व्रजति ।

क: खलु सुशिष्य: जगति ?

य: आचार्यस्य वचनं न उल्लंघयति स:
सुशिष्य: ।

के जगति सुखभाज: ?

ये अकर्तव्यं न आचरन्ति ते सुखभाज: ।

के दानयोग्या: ?

ये अकिंचना: सदाचारवन्त: ते दानयोग्या: ।

के सर्वथा त्याज्या: इह लोके ।

ये अधर्मं आचरन्ति ते सर्वथा त्याज्या:
इह लोके ।

का तव कान्ता क: ते पुत्र:
संसार: अयमतीव विचित्र: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

૬૭

अहं अटवीं गच्छामि।

अहमटवीं गच्छामि।

शिष्याः आचार्यमनुसरन्ति।

मित्रमापदि न त्यजेत् सज्जनः।

जडे शिष्ये वितरति विद्यामाचार्यः।

पुत्रमुत्सङ्के धारयति माता।

शीतकिरणैः तर्पयति विश्वमिन्दुः।

ऋषीणामुपदेशः सर्वथा हितकरः एव।

नीरुजानामौषधैः किं प्रयोजनम्।

૬૮

भास्करस्यापराधं न क्षाम्यामि।

हरिलालस्यापराधं न क्षाम्यामि।

कस्यायं कन्दुकः।

ममायं कन्दुकः।

नायं कन्दुकः गोविन्दस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नायं मम दण्डः ।

क्वास्ति ममासनम् ।

अत्रास्ति तवासनम् ।

तत्रास्ति लक्ष्मणस्यासनम् ।

इयं ललनाराधयति पशुपतिम् ।

सा बालागच्छत् देवगृहम् ।

नाचरेत् अविवेकं गुरुं प्रति ।

६९

इन्दुं वियति न पश्यामि ।

न पश्यामीन्दुं वियति ।

वियतीन्दुं न पश्यामि ।

इन्द्रः स्वर्गं गच्छति ।

स्वर्गं गच्छतीन्द्रः ।

उपवनवृक्षात् मधु क्षरति ।

मधूपवनवृक्षात् क्षरति ।

क्व गच्छसीति मामवदत् चन्द्रकान्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

૭૦

रामः गच्छति ।

रामो गच्छति ।

ज्वलनो दहति ।

शिष्यो वदति ।

वृक्षो नम्रो भवति ।

पुत्रो जनकं प्रीणयति ।

छात्रो घटं जलेन पूरयति ।

वृक्षो झंझावातेन पतति ।

नरो डिम्भमाह्वयति ।

कुबेरो धनं रक्षति ।

कृष्णो बलरामस्य भ्राता ।

अश्वो मार्गे तिष्ठति ।

नृपो याचकाय धनं यच्छति ।

रामो रावणं जयति ।

मालाकारो लतायाः पुष्पाणि चिनोति ।

प्रह्लादो हरिं भजति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७१

रामः कन्दुकेन क्रीडति ।

लक्ष्मणः खनति खनित्रेण ।

रथश्चक्राभ्यां चलति ।

पथिकश्छायायां विश्राम्यति ।

शिष्यास्तरुमूले जलं सिञ्चन्ति ।

तृषार्तः पिबति जलम् ।

सर्पः फणां विस्तारयति ।

निशाचरः शर्वर्यां चरति ।

नरः षड् चौरान् ताडयति ।

भास्करः सवितारं नमति ।

चन्द्रश्चकोरमाह्लादयति ।

रामश्च लक्ष्मणश्च मिथिलामगच्छताम्

कपोतस्तत्र निषीदति ।

को धन्यस्तृष्णायाः पारं गतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

૭૨

पाण्डवा अरण्यमगच्छन् ।

विहगा आकाशे डयन्ते ।

मरणकाले जना इष्टदेवं स्मरेयुः ।

नास्तिका जना ईश्वरं नैव मानयन्ति ।

पौरा उज्जयिनीं गच्छन्ति ।

कौरवा एतादृशं पापं कथं कुर्युः ।

चन्द्रमा ओषधीनां पतिः ।

छात्राः क्व गच्छन्ति ।

छात्राः शालां गच्छन्ति ।

योधाः समराङ्गणं गच्छन्ति ।

बालाः खट्वायां खेलन्ति ।

नराश्चन्द्रमसं पश्यन्ति ।

ललनास्तारकाः पश्यन्ति ।

शाखामृगाः पतन्ति तरुशाखाभ्यः ।

नराः फलं लभन्ते स्वकर्मणाम् ।

एते शिवभक्ताः शिवालयं गच्छन्ति ।

नाविका उडुपं समुद्रतटं नयन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७३

दृषत् पतति ।

दृषद् हस्तात्पतति ।

हुतभुक् काष्ठं दहति ।

विपत् तपोनिष्ठं जनं न मोहयति ।

मरुत् पादपान् कम्पयति ।

दृषद्गिरेः पतति ।

हुतभुग् वृक्षं दहति ।

विपद् धीरं पुरुषं न मोहयति ।

नृपाद् दण्डमपेक्षतेऽपराधी नरः ।

चौराद् भयं न निर्धनस्य ।

☆

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीय पुस्तक

१

अहम् अटवीं गच्छामि ।

अहमटवीं गच्छामि ।

शिष्याः आचार्यम् अनुसरन्ति ।

शिष्याः आचार्यमनुसरन्ति ।

मित्रम् आपदि न त्यजेत् ।

मित्रमापदि न त्यजेत् ।

विश्वम् इन्दुः तर्पयति ।

विश्वमिन्दुः तर्पयति ।

ऋषीणाम् उपदेशः हितकरः ।

ऋषीणामुपदेशः हितकरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२

कस्य अयम् कन्दुकः ।
कस्यायम् कन्दुकः ।
ममायम् कन्दुकः ।
रामस्यायम् कन्दुकः ।
इदं ममासनम् ।
इदं तवासनम् ।
स्वर्गं गच्छति इन्द्रः ।
स्वर्गं गच्छतीन्द्रः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३

रामः गच्छति ।

रामो गच्छति ।

ज्वलनः दहति ।

ज्वलनो दहति ।

शिष्यः वदति ।

शिष्यो वदति ।

पुत्रो जनकं प्रीणयति ।

कुबेरो धनं रक्षति ।

कृष्णो बलरामस्य भ्राता ।

अश्वो मार्गे तिष्ठति ।

रामो रावणं जयति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४

राम: कन्दुकेन क्रीडति ।
लक्ष्मणः खनति खनित्रेण ।
रथश्चक्राभ्याम् चलति ।
पथिकश्छायायाम् विश्राम्यति ।
शिष्यास्तरुमूले जलं सिञ्चन्ति
तृषार्तः पिबति जलम् ।
सर्पः फणां विस्तारयति ।
निशाचरः शर्वर्याम् चरति ।
नरः षड् चौरान् ताडयति ।
भास्करः सवितारम् नमति ।
चन्द्रश्चकोरमाह्लादयति ।
रामश्च लक्ष्मणश्च मिथिलामगच्छताम्।
कपोतस्तत्र निषीदति ।
को धन्यस्तृष्णायाः पारं गतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६

लक्ष्मणोऽरण्यं गच्छति ।

रामोऽरण्यं गच्छति ।

चीमनलालोऽनृतं न वदति ।

नृपोऽपराधिनम् दण्डयति ।

शिष्योऽध्ययने कुशलोऽस्ति ।

देहोऽयं महता पुण्येन क्रीतस्त्वया।

अयमाचार्य आगच्छति ।

धेनव आगच्छन्ति वनात् ।

कपोत आचामति जलं घटात् ।

बीजेभ्य उद्गच्छन्ति वृक्षाः ।

अयं वायस उलूकं पीडयति ।

दुष्यन्त एकदा कण्वाश्रममगच्छत्।

चन्द्र ओषधीनां पतिः ।

रथ एकेन चक्रेण न चलति।

बाल उत्सगे वर्तते मातुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६

छात्राः गच्छान्ति ।

छात्रा गच्छन्ति ।

ब्राह्मणा घृतम् पिबन्ति ।

वीरा देशरक्षणार्थम देहान् त्यजन्ति।

नरा धर्मं न कदापि त्यजेयुः ।

आचार्या जाड्यम् हरन्ति ।

योधा नायकमनुसरन्ति ।

पाण्डवा ब्रह्मारण्येऽवसन् ।

पादपा भागीरथीतीरे रोहन्ति ।

छात्रा मम समीपमागच्छन्ति

नरा यशोऽभिवाञ्छान्ति ।

बाला रथ्यायाम क्रीडन्ति ।

मधुकरा लतासु गुञ्जन्ति ।

धीरा विपदि न मुह्यन्ति ।

सुवर्णकारा हेमं संशोधयन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

૭

पाण्डवा अरण्यमगच्छन् ।
विहगा आकाशे डयन्ते ।
मरणकाले जना इष्टदेवं स्मरेयुः ।
नास्तिका जना ईश्वरं नैव मानयन्ति ।
पौरा उज्जयिनीं गच्छन्ति ।
कौरवा एतादृशं पापं कथं कुर्युः ।
छात्राः क्व गच्छन्ति ।
छात्राः शालां गच्छन्ति ।
योधाः समराङ्गणं गच्छन्ति ।
बालाः खट्वायां खेलन्ति ।
नराश्चन्द्रमसं पश्यन्ति ।
ललनास्तारकाः पश्यन्ति ।
शाखामृगाः पतन्ति तरुशाखाभ्यः ।
नराः फलं लभन्ते स्वकर्मणाम् ।
एते शिवभक्ताः शिवालयं गच्छन्ति ।
नाविका उडुपं समुद्रतटं नयन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८

हरिर्यजति बहुद्रव्येण ।

कविर्गच्छति भोजराजधानीम् ।

कपिर्वृक्षात् वृक्षमुत्पतति ।

ऋषिरागच्छति तमसातीरात्

मनोरथानामगतिर्न विद्यते ।

बुद्धिर्यस्य बलं तस्य ।

मतिरेव बलाद्गरीयसी ।

श्रीः क्व वसति । श्रीर्वसति साहसे ।

गुरोरादेशं क उल्लंघयेत् पापः ।

तरोः शाखायां कोऽयं तिष्ठति ।

अग्नेर्ज्वाला मां दहति खलु ।

व्याधेर्वेदनां रोगी परमार्थतो जानाति ।

हिमगिरेरुद्भवति भगवती पापमोचनी गङ्गा ।

तारकाभिर्विभाति रात्रिः ।

राकापतिश्चक्षुरानन्दयति ।

उदधेस्तीरे वालुकासु क्रीडन्ति बालाः ।

धूर्जटिः रक्षति पुष्पदन्तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धूर्जटी रक्षति पुष्पदन्तम् ।

शिशू रथ्यायाम् क्रीडति ।

हरी राजपुत्रैः सह क्रीडति ।

९

ईश्वरस्येच्छा केवलं बलीयसी ।

दुष्यन्तस्येन्द्रेण सह सख्यम् ।

कस्येषुरयम् ।

नायम् ममेषुः ।

कस्यायम् तर्हि ।

भास्करस्येषुरयम् भवेत् ।

मूर्खस्योपदेशः प्रकोपाय । सज्जनस्यो-
पदेशः शान्तये ।

अर्घ्येणार्षिं पूजयति शिष्यः ।

पार्थस्यैव बाणा मां पीडयन्ति नान्यस्य
कस्याचित् इत्यवदत् शान्तनवः ।

व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०

कोऽस्ति तृणानि ।

तृणान्यत्ति हरिणः ।

कोऽस्ति पर्णानि ।

पर्णान्यत्ति तापसः ।

तृणान्यादायागच्छति किंकरः ।

कमलानि रोहन्ति सरांसि ।

तृणान्युदकं भूमिर्वाक् च सूनृता सतां
गेहे कदाचिदपि नोच्छिद्यन्ते ।

न खल्वहं पापी ।

कोन्वयं तपस्वी जर्जरितवस्त्र आगच्छति ।

क्षुधातुरायै व्याघ्र्यै बोधिसत्त्वेन स्वदेहार्पणं कृतम् ।
इतरमनुष्येष्वीदृशी साधुता न संभवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११

दृषत् पतति ।

दृषद् हस्तात्पतति ।

हुतभुक् काष्ठं दहति ।

विपत् तपोनिष्ठं जनं न मोहयति ।

मरुत् पादपान् कम्पयति ।

दृषद्गिरेः पतति ।

हुतभुग् वृक्षं दहति ।

विपद् धीरं पुरुषं न मोहयति ।

नृपाद् दण्डमपक्षतेऽपराधी नरः ।

चाराद् भयं न निर्धनस्य ।

राजकुलादागतोऽहम् ।

गिरिशिखरादवतरति मयूरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२

अम्बराच्चकोरोऽवतरति ।

हस्ताच्चापं त्यजति योधः ।

कूपाच्छात्रो निर्गच्छति ।

गिरिशिखराज्जटायू रावणमपश्यत् ।

ग्रामान्नरो बहिर्गच्छति ।

वाङ् न मे मधुरा ।

हुतभुङ् न दहति पाषाणम् ।

कस्मान्न त्वया हरिः पूजितः ।

बिडालाँस्ताडय ।

बिडालाँस्ताडयाम्यहम् ।

वानराँश्चित्रकूटे पश्यति दाशरथिः ।

प्रेक्षकाँश्चापभंगेन विस्मापयते रामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३

स जनो मामवदत् ।

स काकः पर्वताग्रे वसति ।

स पापः क्व गतः ।

एष गच्छति स पापः ।

एष भेकस्तडागे वसति ।

भो अर्जुन, एषोऽहम् रामशिष्यः कर्णः ।

भो आचार्य, एषोऽहम् भीमस्तव रथं संचूर्णयामि ।

भोः कण्व, पालयेमां बालां शकुन्तलाम् ।

भोः तपस्विन्, क्व गलितं ते तपः ।

भो जनक, पश्येमौ दशरथस्य पुत्रौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४

सीता गोदावरीपुलिने रमते ।

युधिष्ठिरो द्रौपदीं भाषते ।

हनूमान् सागरं उल्लंघयितुम् आरभते ।

वत्स, कम्पते मे हृदयम् ।

मोदकान् स्वादन्ते ब्राह्मणाः ।

समित्पाणिः शिष्यः ब्रूते 'भो आचार्य,
अभिवादये' इति ।

स्पन्दते मे नयनम् । मम मनः आपदं शंकते ।

गंगायां प्रभूतं जलं वर्तते ।

दुराचारी स्वास्थ्यं न लभते ।

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।

इतीहारमतेवासौ स्नेहस्तयाः स तादृशः ॥

'पुराऽत्रैव वैदेह्या सहाऽहम् अरमे' इति
रामः सीतायाः प्रियसखीं वासन्तीमवदत् ।

गांडीवस्य टंकारेण कौरवाणां हृदयानि अवेपन्त ।

तस्याः वचः श्रुत्वा पार्थः अभाषत ।

दूतः साकेतान्न्यवर्तत ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोदावर्याः पुलिने रामश्चिरकालम्
जानक्या सह अरमत।

वत्स, मोदस्व मोदस्व इति कलापिनं ब्रूते
विदेहराजपुत्री।

विश्वामित्रः सभां प्रविश्य उवाच,
'विजयस्व राजन्' इति।

महता प्रयत्नेनाऽपि सिकतासु तैलं न लभेत।

शिष्यस्य अविनयं गुरुः न सहेत।

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

१८

पुस्तकम् पतितम्।

अद्यैव लक्ष्मणो गतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्व नु खलु स गतः ।

स ऋष्यमूकं प्रति गतः ।

भास्करो वृक्षमूले स्थितः ।

रामेण किं कृतम् ।

रामेण मम कर्णे किमपि कथितम् ।

एष खलु द्यूतकरो राजपुरुषैर्बद्धोऽस्ति ।

भो भो भट्टारकाः, दशसुवर्णस्य रुद्धोऽयम्
पुरुषः प्रपलायितः प्रपलायितः ।

तासामप्सरसां चतुर्दश कुलानि । एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम् । अन्यत् वेदेभ्यः संभूतम् । अन्यत् पवनात् प्रसूतम् । अन्यत् अमृतादुन्मथ्यमानात् उत्थितम् । अन्यत् जलात् जातम् । अन्यत् अर्ककिरणेभ्यो निर्गतम् । अन्यत् सौदामिनीतः प्रवृत्तम् ।

आपदां कथितः पन्था इन्द्रियाणामसंयमः ।
तज्जयः संपदां मार्गो येनेष्टं तेन गम्यताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१६

गच्छन् अहं जलं पिबामि ।

जलं पिबन् अहम् लेखिन्या लिखामि ।

एकेन पादेन तिष्ठन् अहं मन्त्रजपं करोमि ।

एष मूर्खस्तिष्ठन् मूत्रयति ।

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः ।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः ॥

दुर्विनीत, एतं निर्बलं शिष्यं प्रहरन् न लज्जसे ।

पथि गच्छन्तं पुरुषमिहाह्वय ।

धिक् छात्रान् ताडयन्तमाचार्यम् ।

पशुपतिं पूजयता रावणेन कमलस्थाने स्वकीयं नेत्रमर्पितम् ।

दिनेषु गच्छत्सु सा बाला कृशाङ्गी जाता ।

सूर्ये तपति तमिस्रा कथं दृष्टेरावरणाय भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदा वाराणस्याम् अमरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम्।
अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान्॥

१७

यस्मिन् जीवति जीवन्ति बहवः सोऽत्र जीवति।
वयांसि किं न कुर्वन्ति चंच्वा स्वोदरपूरणम्॥
द्रोणे रणधुरां वहति भयस्य कोऽवकाशः।
वृक्षं प्रेक्षमाणोऽहम् तिष्ठामि।
मधुबिन्दुना समुद्रस्य माधुर्यं रचयितुमीहमानो नरः कीदृशः खलु।
जीवत्सु तातपादेषु नवे दारपरिग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः॥
पत्तने विद्यमानेऽपि ग्रामे रत्नपरीक्षा।
त्वया कथ्यमानमपि तद् न विश्वासं जनयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८

प्र०–कस्त्वम् ।

उ०–अहम् छात्रः ग्रामदक्षिणामूर्ति भवनस्य ।

प्र०–किं तव नामाभिधानम् ।

उ०–रामचंद्र इति मे नामाभिधानम् ।

प्र०–किमर्थं त्वया स्वग्रामशालास्त्यक्त्वा अत्र दूरदेशे आगम्यते ।

उ०–अस्मिन् छात्रालये शोभनं राष्ट्रभावपोषकं चाध्ययनं क्रियते इति कृत्वा अहमत्रागतः ।

प्र०–अत्रकृतं अध्ययनं विश्वविद्यालये विफलं भवति इति जनप्रवादः । तुभ्यं किं रोचते एतद् अध्ययनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स०–अथ किम्। विशेषतः रोचते मह्यम् एतत् अध्ययनम्। यतः विश्वविद्यालय-निरपेक्षं सत् जीवने साहायकं भविष्यति इति मे दृढा बुद्धिः।

प्र०–किं द्रव्यं त्वत्तः गृह्णाति आचार्यः अध्यापननिमित्तम्।

स०–न किंचिदपि गृह्णाति आचार्यः तन्निमित्तम्।

प्र०–कस्तव श्लाध्यः सुहृत् अस्मिन् भवने।

उ०–भरतनामा छात्रः मम हृदयंगमं मित्रम् अत्र।

प्र०–अपि विद्यते आचार्यस्य त्वयि स्नेहः।

उ०–न केवलं आचार्यस्य किन्तु सर्वेषामध्यापकानां अपि मयि अपूर्वः स्नेहः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९

प्र०–खड्गपाणयः के यूयम् ।

उ०–खड्गपाणयो वयम् कौरवसैनिकाः ।

प्र०–किं युष्माभिरुत्तरकुमारः क्वापि दृष्टः ।

उ०–न अस्माभिः क्वापि दृष्टः स विराटकुमारः ।

प्र०–किं युष्माभिः क्लीवेषोऽर्जुनसमप्रभावः कोऽपि सारथिर्दृष्टः ।

उ०–अथ किम् । दृष्टोऽस्माभिः दीर्घमूर्धजः क्लीवेष एकः सारथिः ।

प्र०–तर्हि अस्मभ्यं कथयत केन मार्गेण गतः स इति ।

उ०–सावधानाः शृणुत । स सारथिर्मत्स्यचिह्नं रथं वाहयित्वा एतेन श्मशानमार्गेण गच्छन् अस्माभिर्दृष्टः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं जीवितं त्वमसि मे हृदयं द्वितीयम्
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
यूयं वयं वयं यूयमित्यासीद् मतिरावयोः ।
किं जातमधुना येन यूयं यूयं वयं वयम् ॥
विश्वंभरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते ।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानाम्
येषां कुलेषु सविता च गुरुर्वयं च ॥

२०

एतौ भरतः रामचंद्रश्च क गच्छतः ।
भरतरामचन्द्रौ गुर्जराणां राजधानीं गच्छतः ।
एतौ भरतः लक्ष्मणश्च किम् कुरुतः ।
भरतलक्ष्मणौ नगरोपवने क्रीडतः ।
एते हरी रामः प्रद्युम्नश्च किमर्थं इतस्ततः भ्रमन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एते हरिरामप्रद्युम्ना आचार्येण शालाया बहि-र्निःसारिता इतस्ततो भ्रमन्ति ।

एते युधिष्ठिरो भीमोऽर्जुनो नकुलः सह-देवश्च वल्कलानि गृहीत्वा क्व प्रस्थिताः ।

एते युधिष्ठिरभीमार्जुननकुलसहदेवा द्यूतांते अरण्यं प्रस्थिताः ।

कृष्णार्जुनौ खाण्डववनं अदहताम् ।

कुशलवौ दृष्ट्वा दाशरथेश्चित्तक्षोभोऽभवत् ।

मूषकमार्जारयोः कथं संभवति मैत्री ।

इह जगति लुब्धकधीवरपिशुना मृगमीनसज्ज-नानाम् अकारणवैरिणो भवन्ति ।

धर्मार्थकाममोक्षाणाम् यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥

आहारनिद्राभयमैथुनं च
सामान्यमेतत् पशुभिर्नराणाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२१

किम् श्वेतम् इदम् कमलम् ।

न खलु इदं श्वेतकमलम् । नीलकमलम् इदम् ।

किम् पीतम् इदम् अम्बरम् ।

न पीताम्बरमिदम् । रक्ताम्बरमिदम् ।

नाहं कटुवाक्यं कदाचिदपि ब्रवीमि ।

शीतोदकस्य पानमेव पथ्यं ग्रीष्मे ।

दुष्टजनाय उपदेशोऽपि न दातव्यः ।

दीनजनेषु साधवः दयां कुर्वन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२

दशरथपुत्रः रामचन्द्रः ।

पाण्डुपुत्रः अर्जुनः ।

कर्णतुल्यः दाता अद्यपर्यन्तं भुवि न जातः ।

न चोरचोर्यं नं च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥

आकाशात्पतितं तोयं यथा गच्छति सागरं ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥

चोरभयेन स्थाणुरपि मे चोरः भाति ।

संसारतापतप्तः नरः सुखाप्राप्त्यै इतस्ततः भ्रमति न तु शुद्धवैराग्यं विना शान्ति लभते ।

साधुपुरुषचरितः एष मार्गः यत् परकल्याणार्थम् स्वार्थत्यागः ।

मूकः परापवादे परदारनिरीक्षणेऽप्यन्धः ।
पङ्गुः परधनहरणे स जयति लोकत्रये पुरुषः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३

पीतम् अम्बरं यस्यास्ति स पीताम्बरः ।

नीलः कण्ठो यस्यास्ति स नीलकण्ठः ।

त्रीणि कूटानि यस्य स त्रिकूटो नाम पर्वतः ।

शंखः पाणौ यस्य स देवः शंखपाणिः ।

कमलम् आसनं यस्य स देवः कमलासनः ।

अब्जं योनिर्यस्य स देवोऽब्जयोनिः ।

चत्वारो भुजा यस्य स देवश्चतुर्भुजः ।

त्रीणि लोचनानि यस्य स देवस्त्रिलोचनः ।

भाले चन्द्रो यस्य स देवो भालचन्द्रः ।

चक्रं पाणौ यस्य स देवश्चक्रपाणिः ।

एको दन्तो यस्य स देव एकदन्तः ।

लम्बम् उदरं यस्य स लम्बोदरः ।

चत्वारि मुखानि यस्य स चतुर्मुखः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४

पीतम् उदकम् याभिस्ताः पीतोदका गावः।

महत् बलं येषाम् ते महाबला योधाः।

तपः धनम् येषां ते तपोधना यतयः।

जितः श्वासो यैस्ते जितश्वासा योगिनः।

अल्पा मतिर्यस्य सः अल्पमतिः पुरुषः।

जग्धं तृणम् यैस्ते जग्धतृणाः पशवः।

पत्रं हस्ते यस्य सः पत्रहस्तोऽमात्यः।

चन्द्रः मौलौ यस्य स चन्द्रमौलिः।

गतं सत्त्वं यस्मात् स गतसत्त्वो जनः।

निर्गता मक्षिका यस्मात् तत् निर्मक्षिकं स्थानम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५

कन्दुकहस्तो भास्करः ।

पत्रहस्तो हरिलालः ।

महाबलोऽयम् छात्रः ।

यष्टिपाणिरयम् चीमनलालः ।

रक्तवासा लक्ष्मणो गच्छति ।

श्यामवदनः कृष्णः गच्छति ।

शुभ्रवदन आचार्यः क गतः ।

नीलकुन्तला आचार्यपुत्री का गता ।

श्वेतवस्त्रा इयम् नारी देवकुलं याति ।

कृशोदरोऽयम् अमृतलालो दीनमुखस्तिष्ठति ।

ऊर्ध्वज्वालोऽग्निर्हविर्गृह्णाति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२६

अयमहम् पुष्पाणि चिनोमि ।

एष भास्करः कुन्दपुष्पाणि चिनोति ।

बालेयं बकुलपुष्पाणि चिनोति ।

केयम् गोदावरीतटे शिरीषकुसुमानि चिनोति ।

जानकी खल्वियम् तानि चिनोति ।

कल्याणार्थी नरः पुण्यकर्माणि संचिनोति ।

कांचनं लोष्टवत् पश्यन्तो जना न धनं संचिन्वन्ति ।

मालाकाराः चिन्वन्ति जपाकुसुमानि ।

त्वं कथं पूजाकुसुमानि न चिनोषि । किं कथयसि। भ्रातरौ मे चिनुतः इति । न ते युक्तमित्थं जल्पितुम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२७

अयमहं वृक्षस्य शाखां धुनोमि ।

एषोऽहम् निम्बवृक्षस्य विटपम् धुनोमि ।

रामस्तालवृन्तं धुनोति ।

कुक्कुरोऽयं लाङ्गूलं धुनोति ।

एते वयं छात्राः फलपातनार्थं वृक्षशाखा धुन्मः ।

भोः कृष्णे शुनि, किमर्थं पुच्छं धुनोषि । किं कथयसि । स्वल्पप्राप्तावपि लाङ्गूलचालनमस्माकं जातिस्वभावः इति ।

प्रस्वेदपीडिता जनास्तालवृन्तानि धुन्वन्ति ।

धूनोति चम्पकवनानि धुनोत्यशोकम्
चूतं धुनाति धुवति स्फुटितातिमुक्तम् ।
वायुर्विधूनयति चंपकपुष्परेणू-
स्तत्कानने धवति चंदनमंजरीश्च ॥

स्रजमपि शिरस्यंधः क्षिप्तां धुनोत्यहिशंकया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२८

अहम् पटेन मम मुखमावृणोमि ।
अहम् वस्त्राभ्याम् मम मुखमावृणोमि ।
रामो वस्त्रेण फलकमावृणोति ।
अर्जुनः शत्रो रथं बाणैरावृणोति ।
मेघा वर्षायाम् सवितारमावृण्वन्ति ।
शिष्यो वस्त्रेण मुखं वृणोति ।
अहम् तस्य मुखाद् वस्त्रम् अपावृणोमि ।
एते छात्रास्तद् अपावृण्वन्ति ।
अहम् द्वारं संवृणोमि ।
भास्करो द्वारं संवृणोति ।
सामान्यतः भृत्यः शालाद्वाराणि संवृणोति ।
कदाचित्तु शिष्या अपि तानि संवृण्वन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९

अये अहम् किं शृणोमि ।

त्वं घण्टानादं शृणोषि ।

नहि नहि । स मेघनादं शृणोति ।

भो राम, तव वचो नाहम् शृणोमि ।

भो लक्ष्मण, आचार्यप्रवचनं न शृणोषि किम् ।

यदि कश्चित् कर्णगतो दोषस्तत आचार्य समीपम् तिष्ठ ।

के जनाः कटु अपि हितं न शृण्वन्ति ।

मूढाः कट्वपि हितं नैव शृण्वन्ति ।

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति माम् ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥

आश्चर्यवत् पश्यति कश्चिदेनम्
आश्चर्यवत् वदति तथैव चान्यः ।
आश्चर्यवत् चैनमन्यः शृणोति ।
श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूढो राजा धृतराष्ट्रस्य पुत्रो
न मे वाचः पथ्यरूपाः शृणोति ।
अन्धो नूनं भविताऽयम् कुरूणां
सुदारुणः सर्वहरो विनाशः ॥

३०

भो भास्कर, इमां शिलामुद्धर ।

गुरुभारा शिलेयम् । न शक्नोमि तामुद्धर्तुम् ।

भो राम पिबेदं जलम् ।

अहह अतिशीतमिदं जलम् । न शक्नोमि
शिशिरे जलमीदृशं पातुम् ।

भो लक्ष्मण इहागच्छ । त्वां प्रहर्तुमिच्छामि ।

अये कः शक्नोति ममाङ्गस्पर्शनमात्रे ।

दैवमन्यथाकर्तुं साक्षाद् विधिरपि न शक्नोति ।

बहवोऽपि निःसत्त्वा मृगा एकं मृगपतिं विजेतुं
कथं शक्नुवन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे प्रभो, अनेन चर्मचक्षुषा त्वां द्रष्टुम् वयं न शक्नुमः ।

मया रक्षितां मुनिधेनुं प्रहर्तुम् यमोऽपि न शक्नोति किमुत अन्ये हिंस्राः ।

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवान् वेगान् स युक्तः स सुखी नरः ॥

परित्यक्तुं न शक्नोमि दुर्योधनमचेतनम् ।
पुत्रस्नेहेन भगवञ्जानन्नपि प्रियव्रत ॥

३१

अहम् पुष्पाणि चिनोमि । भास्कर त्वमपि चिनु ।

रामः कुसुमानि चिनोति । लक्ष्मण, त्वमपि चिनु । चीमनलालोऽपि चिनोतु ।

अहम् सोमम् सुनोमि । हरिरपि सुनोतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहम् केतनं धुनोमि। लक्ष्मण, त्वं केतनं
धुनु। हरिलालोऽपि केतनं धुनोतु।

अधुना सर्वे शिष्याः केतनं धुन्वन्तु।

भो भास्कर, वातायनद्वारमपावृणु।

प्रियंवदे, उटजद्वारमपावृणु।

अद्य शिष्या अपावृण्वन्तु विनयमंदिरद्वाराणि।

भृत्या अपावृण्वन्तु प्रासादद्वाराणि।

भो लक्ष्मण, शृणु मे वचनम्।

परिक्षित् शुकोपदेशं शृणोति। त्वमपि शृणु।

शृणुत रे पौरजानपदाः, अयम् रामभद्रो महाराज
दशरथस्याज्ञया साकेतान्निर्गत्य वनं गच्छति।

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२

अहम् जलपानं करोमि ।

अहम् नमस्कारं करोमि ।

अहम् क्रोधं करोमि ।

भास्करो जलपानं करोति ।

अयम् मृदङ्गो ध्वनिं करोति ।

अयम् पक्षी कलकलं करोति ।

एते वयं हास्यं कुर्मः ।

ईश्वरकृपा मूकं वाचालं करोति ।

अयम् लक्ष्मणः सुरापानं करोति ।

भो लक्ष्मण, किमर्थं सुरापानं करोषि ।

सज्जना न कदापि सुरापानं कुर्वन्ति ।

साधवः सर्वेषाम् उपकारं कुर्वन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कवि भूपालस्य कीर्तिं सर्वदिक्षु प्रतनोति।

जामाता कन्यायाः पाणिमङ्गीकरोति।

अग्निः सर्वं भस्मसात् करोति।

जाड्यं धियो हरति सिंचति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं।
सत्संगतिः कथय किं न करोति पुंसाम्॥

३३

भो भास्कर, शीतम् इदम् जलम्। कुरु जलपानम्।

भो लक्ष्मण, इदमुष्णोदकम्। तेन पादप्रक्षालनं कुरु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भो राम, सुपक्वानीमानि बदरीफलानि । तानि स्वीकुरु, इति राघवमवदत् शबरी ।

भो धनिकपुत्र, धनजनयौवनगर्वं मा कुरु ।

पुत्र, अहं ते प्रीतोऽस्मि । देवो दक्षिणामूर्तिस्ते कल्याणं करोतु ।

सर्वे देवा अस्माकं मङ्गलं कुर्वन्तु ।

अद्य वसन्तोत्सवप्रसंगे सर्वे छात्रा निशीथ-समयपर्यन्तं क्रीडनम् कुर्वन्तु ।

भो भो छात्राः दुष्टजनसंगं मा कुरुत । दृढं ब्रह्मचर्यपालनं कुरुत । मनोवृत्तिं च तपःप्रधानां कुरुत, न भोगप्रधानाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३४

लक्ष्मण, पुष्पाणि चिनु ।

लक्ष्मणः पुष्पाणि अचिनोत् ।

राम, द्वारमपावृणु ।

रामो, द्वारमपावृणोत् ।

भो भास्कर, आचार्योपदेशं शृणु ।

भास्कर आचार्योपदेशमशृणोत् ।

चन्द्रकेतु ध्वजमधुनोत ।

बालोऽयम् शिलामुद्धर्तुम् नाशक्नोत् ।

चीमनलालो वातायनद्वारमपावृणोत् ।

अहमपि वातायनद्वारमपावृणवम् ।

मालाकारः कुसुमानि अचिनोत् ।

अहमपि तानि अचिन्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३८

अये, अहम् कस्यचित् आर्तस्वरम् अशृणवम्।

किं त्वम् न अशृणोः।

अयम् भास्करः किमकरोत्।

भास्करो मृद्भक्षणमकरोत्।

त्वम् किं अकरोः।

अहम् शिरस्ताडनम् अकरवम्।

त्वम् किं अकरोः।

अहम् देवपूजाम् अकरवम्।

दृषदम् उद्धर्तुम् कः अशक्नोत्।

नाहम् ताम् उद्धर्तुम् अशक्नवम्।

सीता रामभद्रेण सहिता वनेऽपि सुखं प्राप्नोत्।

छात्राः क्रीडाभूमिं गत्वा किं अकुर्वन्।

तत्र ते कन्दुकखेलनम् अकुर्वन्।

सैनिकाः घोरं निनादमकुर्वन्।

सर्वे छात्राः मिलिताः अपि शिलामुद्धर्तुम् नाशक्नुवन्।

कुरुक्षेत्रे मृताः सैनिकाः स्वर्गम् प्राप्नुवन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३६

भो भास्कर, आचार्यवचनम् शृणु ।

शिष्य आचार्यवचनम् सावधानतया शृणुयात् ।

भो लक्ष्मण, गुरुपूजार्थम् कुसुमानि चिनु ।

अन्तेवासी गुरुपूजार्थम् कुसुमानि चिनुयात् ।

सुपुत्रः कुलस्य कीर्तिं तनुयात् ।

सुजनः स्वार्थकृते नान्यम् दुनुयात् ।

गृहस्थ आपदर्थे धनरक्षणम् कुर्यात् ।

भृत्यो यथासमयं विद्यालयद्वाराण्यपावृणुयात् ।

कल्याणकामो नरः शनैः शनैर्मनोनिग्रहं कुर्यात् ।

श्रोतारः शान्तचेतसा प्रवचनमेव शृणुयुः, न
कुर्युः कथाविक्षेपम् ।

वीराः समराङ्गणात् पलायनं न कुर्युः ।

ब्राह्मणाः प्राणत्यागकालेऽपि मिथ्याभाषणम्
न कुर्युः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३७

भास्करहस्ते किम् अस्ति ।

भास्करहस्ते पुस्तकं अस्ति ।

मम हस्ते किम् अस्ति ।

तव हस्ते किमस्तीति न जानामि ।

त्वम् माम् जानासि किम् ।

अथ किम् । त्वम् धूर्तो माथुरः इति
जानामि खलु ।

मूढः शास्त्रं न जानाति ।

पापी पुण्यबलं कथं जानाति ।

गुणिन एव गुणान् जानन्ति न
निर्गुणा जनाः ।

मूर्खाः काले प्रियाणि वक्तुमपि न जानन्ति ।

जानामि धर्मं न च मे प्रवृत्तिः
जानाम्यधर्मं न च मे निवृत्तिः ।
केनापि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३८

अहं क्रीडासाधनैः बालं प्रीणामि ।

यः सुचरितैः पितरं प्रीणाति स पुत्रः ।

या शीलेन भर्तारं प्रीणाति सा भार्या ।

एते छात्रा आचार्यं प्रीणन्ति ।

जमनादासः पुस्तकानां विक्रेता ।

अहम् जमनादासात् पुस्तकं क्रीणामि ।

मोहनलालः शाकापणात् शाकान् क्रीणाति ।

नरा महता पुण्यपण्येन इदं शरीरं क्रीणन्ति ।

प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद् भर्तुरेव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यत्
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३९

अहम् रामस्य पुस्तकं मुष्णामि ।

अहम् भास्करस्य आसनं मुष्णामि ।

चोरः धनं मुष्णाति ।

मेघः जलेन वृक्षान् पुष्णाति ।

भो भास्कर, अहम् तव लेखिनीं गृह्णामि ।

वरः कन्यायाः पाणिं गृह्णाति ।

केचित् उदरंभरयः जनाः कन्यायाः शुल्कं गृह्णन्ति ।

दुःशासनः पाञ्चालीं केशेषु गृह्णाति ।

अहम् वत्सं स्तम्भे बध्नामि ।

एतौ भ्रमरौ पुष्पेभ्यः मधु गृह्णीतः ।

मालविका पुष्पाणाम् स्रजं ग्रथ्नाति ।

इमौ राजपुरुषौ अपराधिनम् वधस्तम्भे बध्नीतः ।

वासनाः पुरुषम् संसारे बध्नन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४०

रामः अपक्वफलानि अश्नाति ।

कन्यकाः मणिमालाः ग्रथ्नन्ति ।

साधुः दर्शनमात्रेण पुनाति ।

आवाम् वृक्षशाखां लुनीवः ।

वाताः वृक्षान् धुनन्ति ।

तीर्थोदकं पापिनं पुरुषं पुनाति ।

वानराः लताः लुनन्ति ।

उपवासदिने न किंचित् अश्नामि ।

चोराः प्रासादात् धनं मुष्णन्ति ।

अहम् पुष्पैः भूमिम् आस्तृणामि ।

पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

૪૧

इदं पुस्तकं गृहाण ।

इदं आसनं गृहाण ।

अमुं कंदुकं गृहाण ।

रामः इदं पारितोषिकं गृह्णातु ।

लक्ष्मणः इमाम् मालाम् गृह्णातु ।

भो भो ब्राह्मणाः, मम यज्ञे भूयसी दक्षिणा गृह्णीत ।

के पुस्तकम् गृह्णन्तु ।

भास्कररामलक्ष्मणाः पुस्तकम् गृह्णन्तु ।

काका बलिं गृह्णन्तु ।

तदेषा भवतः कान्ता त्यजैनां वा गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४२

इदं वस्त्रं फलके बधान।

इमाम् अजां रज्ज्वा बधान।

अस्मिन् वृक्षे मृगं बधान।

भास्करः तम् बध्नातु।

लक्ष्मणः तम् बध्नातु।

भो भो ब्राह्मणाः अस्मिन् यज्ञे मा खलु भवन्तः निरपराधिनः पशून् बध्नन्तु बधस्तंभे। न हिंसा किंचिदपि पुण्यमावहति।

सागरं मथ्नन्तु देवाः।

भो भो स्तेन, मा मुषाण मम अजाम्। यदि तां वाञ्छसि, स्वल्पमूल्येनापि क्रीणीहि।

भो भो मर्कट, अस्मिन् उपवने वृक्षं मा लुनीहि।

भो भो मालाकार, बकुलपुष्पाणां मालां अद्यैव ग्रथान। अन्ये सर्वे कुंदानां मालाः ग्रथ्नन्तु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४३

अयम् एकः कन्दुक

इमौ द्वौ कन्दुकौ।

इमे त्रयः कन्दुकाः।

इमे चत्वारः शिष्याः

इमानि चत्वारि पुस्तकानि।

इमानि त्रीणि कुसुमानि।

इमे पञ्च दण्डाः।

इमे षड् तालवृन्ताः।

कति इमे वृक्षाः।

सप्त इमे वृक्षाः।

अष्टौ इमे स्तम्भाः।

नव इमे ग्रहाः।

दश एतानि कमलानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्त एतानि पत्राणि।

षड् एतानि बिल्वफलानि।

पंच एता अङ्गुलयः।

पंच एतानि शास्त्राणि।

चत्वार इमे भ्रातरो यूयम् विवाहदीक्षिता।
इत्यवदत् सीता।

तिस्रो वयम् भगिन्यः।

चतस्रो दिशः पूर्वपश्चिमदक्षिणोत्तराः।

चतुर्भि र्वदनैः जगत् व्याप्नोति वेधाः।

नवभिस्तन्तुभिर्युक्तं इदम् मे उपवीतम्।

षण्णाम् शास्त्राणाम् मध्ये वेदान्तशास्त्रमेव
समीचीनम् कल्याणवहं च यथार्थतः।

चतसृणाम् मम कन्यकानां मध्ये एका एव बधिरा
न तु सर्वाः।

अनयो र्द्वयो र्वृक्षयो र्मध्ये कः खलु प्रच्छायतरः।

त्रिषु लोकेषु तस्य यशः प्रथितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४५

स राजा पृथ्वीं यज्ञाय दुदोह।

पंपातीरे राघवः पक्षिणां विरावं शुश्राव।

दुःशासनं भूमौ निक्षिप्य भीमस्तद्रुधिरं पपौ।

ऋषिभिः पृष्टा सावित्री सर्ववृत्तान्तं कथयांचकार।

हिरण्यकशिपुः नाम असुरः देवान् भृशं पीडयांचकार।

स व्याधसुतः कस्मैचिदपि न न्यूनं ददौ।

सर्वान् पदार्थान् यथावत् तोलयांचकार।

भीमः कीचकं मुष्टिभिस्ताडयांचकार।

देवाः सागरं गत्वा विष्णुं प्रार्थयांचक्रुः।

उदधिमंथनकाले सागरादुद्भूतं हालाहलं कः पपौ। किं देवाः तत् पपुः किं वा राक्षसाः। न खलु न खलु। देवानामपि देवस्तत् स्वकंठे दधौ।

अयं गोपशिशुः कालीयं हत्वा तस्य मस्तकस्योपरि रेमे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४६

अपि एतत् तपोवनम् ।

अपि ज्ञायते कतमेन दिग्भागेन गतः स
जाल्मः इति ।

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥

युष्माकं तीर्थजलानि शिवानि कच्चित् ।

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनंजय ॥

भो पार्वति, इदमुग्रं तपः क्व तावकं कोमलं च
वपुः क्व ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुं दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

क्व बत हरिणकानां जीवितं चातिलोलम् ।
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥

चिन्तया आत्मानमपि नैषा विभावयति किं
पुनरागंतुकम् ।

ऋषिप्रभावान्मयि नांतकोऽपि
प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ।

एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

४७

वरं मौनं कार्यं न च वचनमुक्तं यदनृतम्
वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् ।
वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचि
र्वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरमेको गुणी पुत्रो न च मूर्खशतानि च।
एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च॥

अविनीत, किं न सत्त्वानि विप्रकरोषि।

हंत वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयाऽसि।

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यंति च सिद्धसंघाः॥

दिष्टया प्रतिहतम् अमंगलम्।

दिष्ट्या परित्रातो भवान् देव्या।

दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान् वर्धते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितो

(अनुष्टुप्)

मूकं करोति वाचालं पंगुं लंघयते गिरिम् ।
यत्कृपा तमहं वंदे परमानंदमाधवम् ॥

(अनुष्टुप्)

गंगा पापं शशी तापं दैन्यं कल्पतरुस्तथा ।
पापं तापं च दैन्यं च घ्नंति संतो महाशयाः ॥

(उपजाति)

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं शास्त्रकोटिभिः।
परोपकारः पुण्याय पापाय परपीडनम् ॥

(अनुष्टुप्)

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेद् जलम्।
सत्यपूतं वदेद् वाक्यं मनःपूतं समाचरेत् ॥

(उपजाति)

साहित्यसंगीतकलाविहीनः
साक्षात् पशुः पुच्छविषाणहीनः।
तृणं न खादन् अपि जीवमानः
तद् भागधेयं परमं पशूनाम् ॥

(अनुष्टुप्)

चलं चित्तं चलं वित्तं चले जीवितयौवने।
चलाचलमिदं सर्वं धर्मं एको हि निश्चलः ॥

(तोटक)

मणिना वलयं वलयेन मणिः
मणिना वलयेन विभाति करः।
पयसा कमलं कमलेन पयः
पयसा कमलेन विभाति सरः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥

(उपजाति)

येषां न विद्या न तपो न दानं
न चापि शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूताः
मनुष्यरूपेण मृगाश्चरन्ति ॥

(अनुष्टुप्)

दुर्जनः प्रियवादी च नैतद् विश्वासकारणम् ।
मधु तिष्ठति जिव्हाग्रे हृदये तु हलाहलम् ॥

उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बांधवः ॥

आशा नाम मनुष्याणां काचिद् आश्चर्यशृंखला ।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पंगुवत् ॥

गौरवं प्राप्यते दानात् न तु वित्तस्य संचयात् ।
स्थितिरुच्चैः पयोदानां पयोधीनाम् अधःस्थितिः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

गोभिः क्रीडितवान् कृष्णः इति गोसमबुद्धिभिः।
क्रीडत्यद्यापि सा लक्ष्मी अहो देवी पतिव्रता॥

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति॥

भो दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः।
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन॥

यथा चित्तं तथा वाचा यथा वाचा तथा क्रिया।
चित्ते वाचि क्रियायाम् च साधूनाम् एकरूपता॥

यौवनं धनसंपत्तिः प्रभुत्वम् अविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥

चिन्तनीया हि दुःखानाम् आदौ एव प्रतिक्रिया।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे॥

वैद्यराज नमस्तुभ्यं यमराजसहोदर।
यमस्तु हरति प्राणान् वैद्यः प्राणान् धनानि च।

ऊर्ध्वबाहु र्विरौम्येष न च कश्चित् शृणोति मे।
धर्माद् अर्थश्च कामश्च स धर्मः किं न सेव्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहं ।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ।

उष्ट्राणां लग्नवेलायाम् गर्दभाः स्तुतिपाठकाः ।
परस्परं प्रशंसन्ति अहो रूपम् अहो ध्वनिः ॥

किं कवेः तस्य काव्येन किं कांडेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥

उदेति सविता रक्तो रक्त एवास्तमेति च ।
संपत्तौ च विपत्तौ च महताम् एकरूपता ॥

कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन् एव वित्तानि यः परेभ्यः प्रयच्छति ॥

बहवो यत्र नेतारः सर्वे पंडितमानिनः ।
सर्वे महत्त्वमिच्छंति तद् वृन्दम् अवसीदति ॥

श्रूयताम् धर्मसर्वस्वं श्रुत्वा चैवावधारयेत् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

विद्वत्त्वं च नृपत्त्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

हस्तस्य भूषणम् दानं सत्यं कंठस्य भूषणम् ।
श्रोत्रस्य भूषणम् शास्त्रं नेत्रस्य समदर्शिता ॥

गुणं पृच्छस्व मा रूपं शीलं पृच्छस्व मा कुलम् ।
सिद्धिं पृच्छस्व मा विद्यां त्यागं पृच्छस्व मा धनम् ॥

यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यंति अध्रुवं नष्टमेव च ॥

पुण्यस्य फलमिच्छंति पुण्यं नेच्छंति मानवाः ।
न पापफलमिच्छान्ति पापं कुर्वन्ति यत्नतः ॥

न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।
कामये दुःखतप्तानाम् प्राणिनाम् आर्तिनाशनम् ॥

उत्तमा आत्मना ख्याता पितुः ख्याता च मध्यमा ।
अधमा मातुलात् ख्याता श्वशुराच्चाधमाधमा ॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणाम् निद्रया कलहेन वा ॥

संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानां इतश्चेतश्च धावताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शार्दूलविक्रीडित)

केयूरा न विभूषयंति पुरुषं हारा न चंद्रोज्ज्वला:
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजा: ।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयंते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

(अनुष्टुप्)

पात्रापात्रविवेकोस्ति धेनुपन्नगयोरिव ।
तृणात् संजायते क्षीरं क्षीरात् संजायते विषम् ॥

(शार्दूलविक्रीडित)

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वेपि नैतादृशा:॥
केचिद् वृष्टिभिरार्द्रयंति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वच:॥

(अनुष्टुप्)

सुलभा: पुरुषा राजन् सततं प्रियवादिन: ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभ: ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(उपजाति)

आरंभगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥

क्षारं जलं वारिमुचः पिबन्ति
तदेव कृत्वा मधुरं वमन्ति ।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति ॥

(वसंततिलका)

लांगूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिंडदस्य कुरुते गजपुंगवस्तु
धीरं विलोकयति चाटुशतैश्च भुंक्ते ॥

(अनुष्टुप्)

को न याति वशं लोके मुखे पिंडेन पूरितः ।
मृदंगो मुखलेपेन करोति मधुरं ध्वनिम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन् ।
मणिनालंकृतः सर्पः किमसौ न भयंकरः ॥

(वसंततिलका)

पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥

(उपजाति)

आहारनिद्राभयमैथुनं च
सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषाम् अधिको विशेषः
धर्मेण हीनाः पशुभिस्समानाः ॥

(अनुष्टुप्)

संपत्सु महतां चेतो भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शार्दूलविक्रीडित)

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः।
अक्रोधस्तपसः क्षमा प्रभवितु धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥

एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृताः स्वार्थाविरोधेन ये।
तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नंति ये
ये तु घ्नंति निरर्थकं परहितं ते केन जानीमहे ॥

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशितांकुशेन समदो दंडेन गोगर्दभौ ।
व्याधि भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषम्
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥

(वसंततिलका)

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहताः विरमन्ति मध्याः ।
विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजंति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(उपजाति)

दीपाः स्थितं वस्तु विभावयन्ति
कुलप्रदीपास्तु भवन्ति केचित्
चिरव्यतीतान् अपि पूर्वजान् ये
प्रकाशयन्ति स्वगुणप्रकाशात् ॥

(अनुष्टुप्)

अपहृत्य परस्यार्थान् यः परेभ्यः प्रयच्छति ।
स दाता नरकं याति यस्यार्थास्तस्य तत्फलम् ॥
विपदो नैव विपदः संपदो नैव संपदः ।
विपद् विस्मरणं विष्णोः संपन् नारायणस्मृतिः ॥

(उपजाति)

वनेऽपि सिंहा मृगमांसभक्षिणो
बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता
न नीचकर्माणि समाचरन्ति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(उपजाति)

न नीचजातस्य ललाटशृंगम्
कुलप्रसूतस्य न पाणिपद्मम्।
यदा यदा मुंचति वाक्यबाणं
तदा तदा जातिकुलप्रमाणम् ॥

(अनुष्टुप्)

सर्वाः संपत्तयस्तस्य संतुष्टं यस्य मानसम्।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥

अंजलिस्थानि पुष्पाणि वासयन्ति करद्वयं।
अहो सुमनसां प्रीतिर्वामदक्षिणयोः समा ॥

न देवो विद्यते काष्ठे न पाषाणे न मृण्मये।
भावे हि विद्यते देवो तस्माद् भावो हि कारणम् ॥

आपदो महतामेव महतामेव संपदः।
क्षीयते वर्धते चंद्रः कदाचिन्नैव तारकाः ॥

असद्भिः शपथेनोक्तं जले लिखितमक्षरम्।
सद्भिस्तु लीलया प्रोक्तम् शिलालिखितमक्षरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

मक्षिका व्रणमिच्छंति धनमिच्छंति पार्थिवाः ।
नीचाः कलहमिच्छंति शांतिमिच्छंति साधवः ॥

युक्तियुक्तं प्रगृह्णीयाद् बालादपि विचक्षणः ।
रवेरविषयं वस्तु किं न दीपः प्रकाशयेत् ॥

(उपजाति)

तृणानि नोन्मूलयति प्रभंजनो
मृदूनि नीचैः प्रणतानि सर्वशः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रियाम् ॥

(मालिनी)

मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥

(अनुष्टुप्)

ज्यायांसमपि शीलेन विहीनं नैव पूजयेत् ।
अपि शूद्रं च धर्मज्ञं सद्वृत्तमपि पूजयेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शार्दूलविक्रीडित)

प्राणानां परिरक्षणाय सततं सर्वाः क्रियाः प्राणिनाम्
प्राणेभ्योऽभ्यधिकं समस्तजगतां
नास्त्येव किंचित् प्रियम् ।
पुण्यं तस्य न शक्यते गणयितुं यः पूर्णकारुण्यवान्
प्राणानाम् अभयं ददाति सुकृती तेषां अहिंसाव्रतः॥

(शिखरिणी)

यदा किंचिद्ज्ञोऽहं द्विप इव मदान्धः समभवम्
तदा सर्वज्ञोऽस्मित्य भवदवलिप्तं मम मनः ।
यदा किंचित् किंचित् गुरुजनसकाशादधिगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥

(शार्दूलविक्रीडित)

विष्णुर्वा त्रिपुरान्तको भवतु वा ब्रह्मा सुरेन्द्रोऽथवा
भानुर्वा शशलक्षणोऽथ भगवान बुद्धोऽथ सिद्धोऽथवा।
रागद्वेषविषार्तिमोहरहितः सत्त्वानुकंपोद्यतो
यः सर्वैः सह संस्कृतो गुणगणैः तस्मै नमः सर्वदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शार्दूलविक्रीडित)

उत्तिष्ठ, क्षणमेकमुद्वह गुरुं दारिद्र्यभारं सखे
श्रान्तस्तावदहं चिरं मरणजं सेवे त्वदीयं सुखम् ।
इत्युक्तो धनवर्जितेन सहसा गत्वा स्मशाने शवो
दारिद्र्यान् मरणं वरंवरमिति ज्ञात्वैव तूष्णीं स्थितः॥

(मालिनी)

ददतु ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ।
जगति विदितमेतद् दीयते विद्यमानं
न हि शशकविषाणं कोऽपि कस्मै ददाति ॥

(वसंततिलका)

किं जन्मना च महता पितृपौरुषेण
शक्तया हि याति निजया पुरुषः प्रतिष्ठाम् ।
कुम्भा न कूपमपि शोषयितुं समर्थाः
कुम्भोद्भवेन मुनिनाम्बुधिरेव पीतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(वसंततिलका)

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥

(मंदाक्रांता)

तातस्नेहो भरतमहिमा पौरुषं वायुसूनोः
सख्यं चापि प्लवगनृपतेः क्वापि सौमित्रिभक्तिः।
सीतासत्यं निजभुजबलं वैरिणां वैरिभावो
ज्ञातं सर्वं तव चरणयोर्मातरेषः प्रसादः॥

(चम्पू रामायण)

(स्रग्धरा)

नित्यं छेदस्तृणानां क्षितिनखलिखनं
पादयोरल्पपूजा
दन्तानामल्पशौचं वसनमलिनता
रूक्षता मूर्धजानाम्।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं
ग्रासहास्यातिरेकः
स्वांगे पीठे च वाद्यं हरति धनपतेः
केशवस्यापि लक्ष्मीम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शार्दूलविक्रीडित)

क्षान्तिश्चेत्: कवचेन किं किमरिभिः
क्रोधोस्ति चेद् देहिनाम्
ज्ञातिश्चेदनलेन किं यदि सुहृद्
दिव्यौषधैः किं फलम् ।
किं सर्पैर् यदि दुर्जनः किमु धनैर्
विद्यानवद्या यदि
व्रीडा चेत् किमु भूषणेन कविता
यद्यस्ति राज्येन किम् ॥

(भर्तृहरि नीतिशतक)

(अनुष्टुप्)

संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
काव्यामृतरसास्वाद आलापः सज्जनैः सह ॥

क्वचिद्रुष्टः क्वचित्तुष्टः रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोपि भयंकरः ॥

किं क्षणस्य कुतो विद्या किं कणस्य कुतोधनम् ।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुप्)

तक्षकस्य विषं दन्ते मक्षिकायाः विषं शिरः ।
वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जनो विषम् ॥

सुजनो दुर्जनश्चैव तावुभौ नित्यदुःखिनौ ।
सुजनः परदुःखेन परसौख्येन दुर्जनः ॥

उदारचरितस्त्यागी याचितः कृपणोऽधिकः ।
एको धनं ततः प्राणानन्यः प्राणांस्ततो धनम् ॥

न कश्चिच्च बहिर्याति मानिनां प्रार्थनागिरः ।
यदि निर्यातुमिच्छन्ति तदा प्राणपुरःसराः ॥

(शार्दूलविक्रीडित)

यास्यत्यद्य शकुन्तलेति हृदयं
संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुष
श्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि
स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनया–
विश्लेषः दुःखैर्नवैः ॥

(शाकुन्तल – कालिदास)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शार्दूलविक्रीडित)

पातुं न प्रथमं व्यवस्यति जलं
युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां
स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये
यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं
सर्वैरनुज्ञायताम् ॥

(शाकुन्तल – कालिदास)

(पुष्पिताग्र)

यदि समरमपास्य नास्ति मृत्यो
र्भयमिति युक्तमितोन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तो
किमिति मुधा मलिनं यशः कुरुध्वे ॥

(वेणीसंहार)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(हरिणी)

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथ
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदां चयः॥

(उत्तररामचरितम् – भवभूति)

(शिखरिणी)

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥

(उत्तररामचरितम् – भवभूति)

(अनुष्टुप्)

अज्ञानतिमिरान्धस्य ज्ञानांजनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः॥

☆

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar